॥श्रीगणेशायनमः॥ चूडामणिकृतविष्कृतवासकृष्णः॥ भवोभवतुभव्यायलीलाताण्डवपण्डितः॥१॥ निजनिर्मितकारिकाव
क्षीमतिसंक्षिप्तचरंतनोक्तिभिः॥ विशदीकरवाणिकौमुदीमनुराजिवदद्या

ननुलक्षणेतान्येवपदानिग्राह्याणियैःपदैर्व्याप्तिस्तत्याप्तिसंभवाख्याःदोषाः
स्मराक्रयंतेप्रछतेकिमेतावतांपदानांप्रयोजनमितिचेदुच्यते

MEMORIAL DR. BHAU DAJI

॥१॥ ॥श्रीगणेशायनमः॥ चूडामणिकृतविघ्नध्वंसयोर्हेतवासङ्किः॥ नवोमवलुभ्यायलीलातांडवपंडितः॥१॥ निजनिर्मितकारिकावलीमतिसंक्षिप्यचिरंतनोक्तिभिः॥ विशदीकरवाणिकौतुकान्नुराजिवदयावशंवदः॥२॥ सद्व्याख्यागुणगुंफितासकृतिनांसत्कर्मणांसाधिकासत्सामान्यविशेषनिरूपितावयवप्रकर्षोज्वला॥ विघ्नौघंविदधासिविश्वनाथकृतिनासिद्धांतमुक्तावलीविन्यस्तामनसोमुदंवितनुतांसचक्रिरेषाचिरं॥३॥ विघ्नविधातायकृतंमंगलंशिष्यशिक्षायैनिबध्नातिनूतनेत्यादि॥ ननुमंगलंनविघ्नध्वंसप्रतिनवासमाप्तिप्रतिकारणं॥ विनापिमंगलंनास्तिकादीनांग्रंथेनविघ्नयरिसमाप्तिदर्शनादितिचेन्न॥ अविगीतशिष्टाचारविषयत्वेनमंगलस्यसफलत्वसिद्धेतत्रफलजिज्ञासायांसंभवंतिदृष्टफलकेअदृष्टफलकल्पनायाअन्याय्यत्वादुपस्थितत्वात्समाप्तिरेवफलंकल्प्यते॥ इहंचयत्रमंगलंनदृश्यतेतत्रापिजन्मांतरीयंतत्कल्प्यते॥ यत्रसत्यपिमंगलेसमाप्तिर्नदृश्यतेतत्रबलवत्तरोविघ्नस्तत्प्राचुर्यंवाबोध्यं॥ प्रचुरस्यस्यैववबवत्तरविघ्ननिवारणकारणात्तत्॥ विघ्नध्वंसस्यमंगलस्यद्वारमित्याहुः॥ नचास्यमंगस्यविघ्नध्वंसरूपंफलं॥ समाप्तिरूपबुद्धिप्रतिबंधादिकारणाकल्पनात्॥ नचस्वतःसिद्धविघ्नध्वंसस्यमंगलस्यनिष्फलापत्तेरिति वाच्यं॥ इष्टापत्तेः॥ विघ्नशोकयातदाचरणात्॥ तथैवशिष्टाचारात्॥ नचतस्यनिष्फलत्वेतच्छोधकवेदाप्रामाण्यं॥ सतिविघ्नेतन्नाशस्यैववेदबोधितत्वात्॥ अतवपापक्षयेणकृतप्रायश्चित्तस्यनिष्फलत्वेपिनवेदाप्रामाण्यं॥

विरुद्धता

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥२॥ मंगलं च विघ्नध्वंसविशेषे कारणं। विघ्नध्वंसविशेषे विनायकस्तवपाठादिरिति नव्यमिश्राः॥ सच्च विघ्नध्वंसः समाप्तिसाधनं क्वचिद्विघ्नाभाव एव क्वचिच्च विघ्नासंसर्गाभाव एव समाप्तिसाधनं। प्रतिबंधकसंसर्गाभावमात्रस्यैव तत्तेन कार्यजनकत्वात्॥ इह च नास्तिकादिग्रंथेषु जन्मांतरीयमंगलजन्यदुरितध्वंसः। स्वतः सिद्धविघ्नासंसर्गाभावो वास्तीति नव्यमिश्राः॥ संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजायं। एतेनेश्वरे प्रमाणमपि दर्शितं। यथा घटादिकर्तृजन्यं तथा क्षितिकुरादिकमपि नेति [illegible] अस्मदादि-

-चतत्कर्तृत्वं ॥२॥

= साधर्म्यवैधर्म्यो निखिलपदार्थतत्त्वज्ञाननिश्रेयसोपयोगीति= तदर्थपदार्थतद्धर्मान्निरूपयति। ४

दीनां संभवतीति तत्कर्तृत्वेनेश्वरसिद्धिः॥ न च शरीराजन्यत्वेन कर्तृजन्यत्वसाधकेनसत्प्रतिपक्षइति वाच्यं। अप्रयोजकत्वात्॥ ममतु कर्तृत्वेनैव कार्यं कारणाभाव एवानुकूलतर्कः॥ यावद्धि जनयन्देवएकः विश्वस्यैतावत्त्वनस्य कर्त्तेत्यादयआगमाश्चानुसंधेयाः॥ द्रव्यं गुण इत्यादि। समस्याभावपक्षे वैयर्थ्यापत्तेरभावत्वप्रासं। तेनाभावत्वेन पृथगुपन्यासो नकृतः॥ एते च पदार्थाः वैशेषिकप्रसिद्धाः॥ नैयायिकानामप्यविरुद्धाः॥ प्रतिदितं चैतमेवार्थे। अतएवोपमानमपीसप्तपदार्थीसिद्धतयासादृश्यस्यातिरिक्तपदार्थत्वमाशंकितं। ननुकथमेते एवपदार्थाः॥ शक्तिसादृश्यादीनामपि ऽतिरिक्तपदार्थत्वात्॥ तथाहि। मण्यादिसन्निधानेनवह्निनादाहोनजन्यते

कार्यत्वे न २

तद्धूत्येनतुजन्यते। तत्रमण्यादिनावह्नेर्दाहानुकूलाशक्तिर्नीयते। उत्तेजकेन
मण्याद्यपसारणेनचजन्यतेइतिकल्प्यते। एवंसादृश्यमपरिक्तःपदार्थः।
तद्विनषड्भावेष्वन्तर्भवतिसामान्येपिसत्वात्। यथागोस्तिनित्यंतथाश्वस्तमितिसाद
श्यप्रतीतेः। नाप्यभावेसत्वेनप्रतीयमानत्वात्इतिचेन्न। मण्याद्यभावविशि
ष्टस्यवह्न्यादेर्दाहादिकंप्रतिमण्याद्यभावादेरेववास्तवेनहेतुत्वंकल्प्यते। अ
तिनेनवसामंजस्येअनंतशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात्। नचो
त्तेजकेसतिप्रतिबंधकसद्भावेकथंदाहइतिवाच्यं। उत्तेजकाभावविशिष्ट
मण्यभावस्यकारणत्वात्। सादृश्यंनपदार्थांतरं। किंतुतद्भिन्नत्वेसतितत्

ति विशेषणविशेष्याभावकामचारादाहमण्याभावादेरेववेति=५ ॥३॥

व्य

द्रव्यमूर्ध्वगुरुत्वंसादृश्यं। यथाचंद्रभिन्नत्वेसतिचंद्रतावच्छेदकत्वादिमत्वंमुखेचं
द्रसाम्यमिति। द्रव्याणिविभजते। क्षित्यादिति। क्षितिःपृथिवी। आपोजलानि ते
जोवह्निः मरुदायुः व्योमआकाशं कालआत्मामनः एतानिद्रव्याणीत्यर्थः। ननुद्रव्यत्व न
जातौकिंमानं। नहिप्रत्यक्षं। घृतजलयुक्तेषुद्रव्यत्वाग्रहादितिचेन्न। का
र्यसमवायिकारणतावच्छेदकतयासंयोगस्यविभागस्यवासमवायिकारणताव
च्छेदकतयाद्रव्यत्वजातिसिद्धेरितिं। ननुदशमद्रव्यंतमः कुतोनोक्तं तद्भिन्नस
त्वेणग्रहणात्। तस्यरूपवत्त्वक्रियावत्त्वाच्चद्रव्यत्वं। तच्चगंधशून्यत्वान्न पृ
थिवी। नीलरूपवत्त्वाच्चनजलादिकं। तत्संसर्गेचालोकनिरपेक्षत्वंच

= ननुतमोयदिद्रव्यं तर्हितत्संसर्गेचालोकसंपेक्षंच शुः कारणस्यादित्यतआह तत्संसर्गेति।

लः समयः
दिगाद्या
देही ३

॥४॥ क्षः कारणं इति चेन्न। अवश्यकतेजोभावेनैवोपपत्तौ द्रव्यांतरकल्पनाया अन्याय
त्वात्। रूपवत्त्वाप्रतीतिरूक्षत्वमरुणं। कर्मप्रतीतिरूक्षआलोकापसरणोपाध्यिकी
रे भ्रांतिरेव। तमसोऽतिरिक्तत्वेऽनंतावयवादिकल्पनेगौरवस्यात्। रूक्षवर्णस्य य
था तेजस्यंतर्भावस्तथाग्नेवश्यते। गुणाश्चिंत्यंते। अथ गुणाइति। एते गुणा
श्चतुर्विंशतिसंख्याकाः कणादेनकंठतश्चोद्देशेनदर्शिताः। तत्र गुणत्वादिकजा
ति रग्रेवस्थास्यते। कर्मणिविभक्तेः। उत्क्षेपणेति। कर्मत्वजातिरूक्षत्वसिद्धा
एवंउत्क्षेपणत्वादिकमपि। ननुभ्रमणादिकमपिपृथक्कर्मोच्यिकतयाकुतो नो
क्तमतआह। भ्रमणमिति। सामान्यमिति। तल्लक्षणं

मा

॥४॥

लक्षितत्वेसतिऽनेकसमवेतत्वं। अनेकसमवेतत्वंसंयोगादीनामप्यस्तीसतउक्तंनिस्
त्वेसतीति। निस्त्वेसतिसमवेतत्वंगगनपरिमाणादीनामस्तीतउक्तंअनेकेति। नि
स्त्वेससेनेकवृत्तित्वमसंतावस्थाप्यस्त्येकवृत्तिसामान्यंविहायसमवेतेसतीति। ए
कमात्रव्यक्तिवृत्तिरूक्षजातिः। तथाचोक्तं। व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः।
रूपहानिरसंबंधोजातिबाधकसंग्रहइति। द्रव्यादीति। परत्वमधिकदेशावृत्तित्वं। अप
रत्वमल्पदेशावृत्तित्वं। सकलजात्यपेक्षयाऽधिकदेशावृत्तित्वात्तायापरत्वं। तदपेक्षया
व्याप्यासज्जातीनामल्पदेशावृत्तित्वादपरत्वं। व्यापकत्वादिति। पृथिवीत्वाद्यपेक्षयाव्याप
कत्वादधिकदेशावृत्तित्वात्सरत्वं। सत्तापेक्षयाव्याप्यत्वादल्पदेशावृत्तेद्रव्यत्वस्यापर

त्वं॥ विशेषविरूपयति॥ अंसइति॥ अंतेऽवसानेवर्त्ततइत्संसः॥ यदपेक्षयाविशेषो
नास्तित्यर्थः॥ घटादीनांद्व्यणुकपर्यंतानांतत्तदवयवभेदात्परस्परंभेदः॥ परमाणु
नांपरस्परभेदकोविशेषएवसतुस्वतएवव्यावृत्तः॥ तेनतत्रविशेषांतरापेक्षानास्ती ३
तिभावः॥ समवायंदर्शयति॥ घटादीनामिति॥ अवयवावयविनोर्जातिव्यक्त्योर्गु
णगुणिनोः॥ क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्चयःसंबंधःससमवायः॥ समवा
यस्यनित्यसंबंधत्वं॥ तंत्रप्रमाणंतुगुणक्रियाविशिष्टबुद्धिर्विशेषणविशेष्यसंब
ंधविषयाविशिष्टबुद्धित्वाद्दंडीतिविशिष्टबुद्धिवदित्यनुमानेनसंयोगादिबाधा
त्समवायसिद्धिः॥ नचस्वरूपसंबंधेनसिद्धसाधनंर्थांतरंवा॥ अनंतस्वरूपा

=अजिज्ञासितस्यअर्थस्यअनभिधानं॥ अजिज्ञासितस्यअर्थस्यअभिधानमर्थांतरं॥ = ॥५॥

=संबंधसत्वेपिसंबंध्यनोऽभावादितिभावः २= घटाभावस्याविद्यमानत्वे ४=

णांसंबंधकत्वेकालपनेगौरवात्॥ लाघवादेकसमवायसिद्धिः॥ नचसमवायस्यैकत्वेवायो
रूपवत्ताबुद्धिप्रसंगः॥ तत्ररूपेसमवायसत्वेपिरूपाभावात्॥ नचैवमभावस्यापिवैशि
ष्यसंबंधांतरसिध्येदितिवाच्यं॥तस्यनित्यसंबंधभूतलेघटानयनानंतरमपिभूतलेघ
टाभावबुद्धिप्रसंगात्॥ घटाभावस्यतत्रविद्यमानत्वात्॥ अन्यथादेशांतरेपिघटाभा
वबुद्धिप्रतीतिर्नस्यात्॥ वैशिष्टयस्यचतत्रसत्वात्॥ ॥ममतुघटपा
करक्तादशायांश्यामरूपस्यनष्टत्वान्नतद्वत्ताबुद्धिः॥ वैशिष्टयस्यनित्यत्वेअनं
तवैशिष्टयकल्पनेतदवैगौरवं॥ इहचतत्तत्कालिकतत्तद्भूतलादिकंतत्तदभावंप्रति
संबंधः॥ अभावंविभजते॥ अभावस्त्विति॥ अभावस्तद्द्रव्यादिषट्कान्योन्याभावसं
सर्गेति॥ संसर्गोन्योन्याभावेदादित्यर्थः॥ अन्योन्याभावस्यैकविधत्वात्तद्विभागो

॥६॥ ...भावात्संसर्गाभावविभजन्तेप्रागभावइति।संसर्गाभावत्वंअन्योन्याभावभिन्नाभावत्वं।अन्योन्याभावत्वंतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं।विनाश्याभावत्वंप्रागभावत्वं।जन्याभावत्वंध्वंसत्वं।नित्यसंसर्गाभावत्वंअत्यंताभावत्वं।यत्र तुभूतलादौघटादिकमुपसृत्यपुनरानीतंचतत्रघटकालस्यसंबंधाघटत्वा
दस्यताभावस्यनित्यत्वेऽपिघटकालेनघटस्यताभावबुद्धिः।तत्रोत्पादविनाशा
शालीचतुर्थोयमभावइतिकेचित्।अत्रध्वंसप्रागभावाधिकरणेनास्यताभा
वइतिप्राचांमतं।श्यामघटेरक्तोनास्तिरक्तघटेश्यामोनास्तीतिधीःप्रागभा
वध्वंसावृगाहतेनतुतदस्यताभावं।नव्यास्तुतत्रविरोधेमानाभात्यध्वंसा
कालावच्छेदेनास्यताभावोवर्त्ततएवेत्याहुः।नचस्वभावानोअधिकरणात्मक ॥६॥

स्वंलाघवादितिचेन्न।अनंताधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तकल्पनाया
वलीयस्त्वात्।एवंचाधाराधेयभावोपपद्यते।एवंचतन्तुषुगंधरसाभावानांप्रस
क्तत्वंउपपद्यते।अन्यथातन्तदधिकरणानांतन्तद्रियाग्राह्यत्वासंसक्तत्वंनस्यात्।एते
नतानविशेषकालविशेषात्मकत्वमभावस्येतिस्फुटं।अप्रसक्तस्यापत्तेः।इदानींपदा प्र
र्थानांसाधर्म्यवैधर्म्यवक्तुंप्रक्रमते।समानाभिधाद्।समानोधर्मोयेषांतेसधर्माणः तेषांभावः
साधर्म्यंसमानोधर्मइतिफलितोर्थः।एवंविरुद्धोधर्मोयेषांतेविधर्माणः तेषांभावःवैधर्म्यंवि
रुद्धोधर्मइतिफलितोर्थः।ज्ञेयत्वंज्ञानविषयतासाचसर्वत्रैवास्ति।ईश्वरादिज्ञानविष
यतायाःकेवलान्वयित्वात्।एवमभिधेयत्वंप्रमेयत्वादिकमपिबोध्यं।द्रव्यंगुद्र्यगु
मा णकर्मसामान्यविशेषाणांसाधर्म्यमनेकत्वंसमवायित्वंयद्यप्यनेकत्वमात्रवृत्तितथा

भावत्वं

प्येनैकत्वेसतिभावस्त्वं। तथाचानेकभाववृत्तिपदार्थविभाजकोपाधित्वंफलितोर्थः।
तेनप्रत्येकंघटादीनाव्याप्तिः। समवायित्वंसमवायसंबंधेनसंबंधित्वं। नतुसमवायत्वं। व
सामान्यादावतिव्याप्तेः। सत्तावंतइतिद्रव्यगुणकर्मणांसत्तावत्त्वमित्यर्थः। गुणादि
रितिः। यद्यपिगुणक्रियाशून्यत्वंअत्यक्षणेघटादावतिव्याप्तं। क्रियाशून्यत्वंचगग
नादावतिव्याप्तं। तथापिगुणवद्वृत्तिः[illegible]। कर्मवद्वृत्तिपदार्थविभाजको
पाधित्वंचेत्यर्थः। नहिघटत्वादिकंद्रव्यत्वादिकंवागुणवद्वृत्तिकर्मवद्वृत्तिवा
किंतुगुणत्वादिकंतथाआकाशादिकंनपदार्थविभाजकोपाधिः। सामान्यंइति। सा
मान्यानधिकरणत्वंसामान्यादीनामित्यर्थः। पारिमांडल्यंइति। पारिमांडल्यंपर ७

तथाचसमवेतवृत्तिपदार्थविभाजकोपाधित्वंतेनानित्येषुसमवेतत्वाभावेपिनाव्याप्तिः। २

माणुपरिमाणंतद्भिन्नानेकारणत्वमित्यर्थः। अणुपरिमाणंनकस्यापिकारणं। तद्भि
न्नाश्रयारब्धद्रव्यपरिमाणारंभकंभवेत्तच्चनसंभवति। परिमाणस्यस्वसमानजा
तीयोत्कृष्टपरिमाणजनकत्वंमहतारब्धस्यमहत्त्वंद्व्यणुकजन्यस्याणुत
रत्वप्रसंगात्। एवंपरममहत्परिमाणंआतींद्रियंसामान्यविशेषाश्रयबोध्यः। मान
सप्रत्यक्षेआत्ममहत्त्वस्यकारणत्वात्। परममहत्परिमाणंआकाशादेर्बोध्यं। त
स्यापिनकारणत्वमित्याचार्याणामाशयइत्यन्ये। इदमपियोगिप्रत्यक्षेविषयस्यन
कारणत्वं। ज्ञायमानंसामान्येनप्रसाप्तिः। ज्ञायमानंलिंगंनानुमितिकरणमि
त्यभिप्रायेण। ननुकारणत्वंकिमतआह। अन्यथेति। तस्यकारणत्वस्य।

BHANDARKAR ORIENTAL RESEARCH INSTITUTE MEMORIAL

तन्त्रेति। समवायिकारणप्रत्यासन्नेकारद्वीयेतीत्यसमवायिकारणमित्यर्थः। अत्र यद्यपि तुरीतन्तुसंयोगेपटासमवायिकारणत्वंस्यात्। एवंवेगादीनामपिघाताद्य समवायिकारणत्वंस्यात्। एवंज्ञानादिदीनामिच्छाद्यसमवायिकारणत्वंस्यात्। तथा पिपटासमवायिकारणलक्षणेतुरीतन्तुसंयोगेभिन्नत्वंदेयं। तुरीतंतुसंयोगस्तु तुरीपटसंयोगंप्रतिअसमवायिकारणंभवत्येव। एवंवेगादिकंवेगस्पंदनासम वायिकारणंभवत्येव। तत्तत्कार्यीसमवायिकारणलक्षणेतत्तद्भिन्नत्वंदेयं। आ त्मविशेषगुणानांतुकुत्राप्यसमवायिकारणत्वंनास्ति। तेनतद्भिन्नत्वंसामान्यल क्षणेदेयमेव। अत्रसमवायिकारणप्रत्यासन्नौद्विविधं। कार्यकार्थप्रत्यास

BHANDARKAR ORIENTAL RESEARCH INSTITUTE MEMORIAL

त्तिकारणेकार्थप्रत्यासत्तिश्च। आद्ययथा। घटादिकंप्रतिकपालसंयोगादिकं। तत्रकार्येण घटेनकारणस्यकपालसंयोगस्यैकस्मिन्कपालेप्रत्यासत्तिरस्ति। द्वितीययथा। घटरूपंप्रति कपालरूपमसमवायिकारणं। तत्रघटरूपंप्रतिकारणंघटःतेनसहकपालरूपस्यैकस्मि न्कपालेप्रत्यासत्तिरस्ति। तथाचकश्चित्समवायसंबंधेनकश्चित्स्वसमवायिसमवेतस्वसंब न्धेनेतिफलितोऽर्थः। इत्थंचकार्यकार्थकारणेकार्थान्यतरप्रत्यासत्तिकारणज्ञानादि भिन्नमसमवायिकारणमितिसामान्येतोलक्षणंपर्यवसन्नं। अथसमवायिकारण मसमवायिकारणाभ्यांपरंभिन्नंकारणंतृतीयंनिमित्तकारणमित्यर्थः। इदानीमन्य थासिद्धस्वमेवकथयतामतआरभ्येनेत्यादिना। कार्यंप्रतिकारणस्यपूर्ववृत्तितया

येनरूपेणगृह्यते तत्कार्यंप्रतितद्रूपेमन्यथासिद्धमित्यर्थः॥ यथाघटंप्रतिदंडस्यमिति॥ द्वितीयमन्यथासिद्धमाहुः॥ कारणमितिं॥ यस्यसातत्त्वेणान्वयव्यतिरेकौनस्तः॥ किंतुस्वकारणमादायैवान्वयव्यतिरेकोगृह्येतें॥ तदन्यथासिद्धं॥ यथादंडरूपं॥ तृतीयमाहुः॥ अन्यंप्रतीतिं॥ अन्यंप्रतिपूर्ववर्त्तित्वंगृह्यमाणेवयस्ययत्कार्यंप्रतिपूर्ववर्त्तित्वंगृह्यतेतस्यतत्कार्यंप्रतिअन्यथासिद्धत्वं॥ यथाघटादिकंप्रतिआकाशस्य॥ आकाशस्यहिघटादिकंप्रतिकारणत्वं॥ आकाशेनस्यात्॥ आकाशेसंयोगसमवायिकारणत्वं॥ अतश्चयत्संयोगंप्रतिजनकत्वंगृह्यमाणेवघटादिकंप्रतिजनकत्वंगृह्यं॥ अतस्तदन्यथासिद्धं॥ यत्संयोगयत्वेनतत्तत्कारणत्वे

= तथाचकारणतावच्छेदककपालत्वादिकमित्यर्थोबोध्यः॥ २ =

कान्यथासिद्धिरितिचेत्पंचमीति॥ आकाशस्यसंयोगंप्रतिजनकत्वेकिमवच्छेदकमितिचेत्॥ कपालादिकंविशेषपदार्थोवेति॥ चतुर्थमन्यथासिद्धमाहुः॥ जनकंप्रतीतिं॥ यत्कार्यंजनकंप्रतिपूर्ववर्त्तित्वंगृह्यमाणेवयस्ययत्कार्यंप्रतिपूर्ववर्त्तित्वंगृह्यतेतस्यतत्कार्यंप्रत्यन्यथासिद्धत्वं॥ यथाकुलालपितुर्घटंप्रति॥ तस्यकुलालपितृत्वेनघटंप्रतिजनकत्वेऽन्यथासिद्धिः॥ कुलाल[illegible]स्वरूपेणजनकत्वेविशेषापत्तिः॥ कुलालमात्रस्यघटंप्रतिजनकत्वात्॥ पंचममन्यथासिद्धमाहुः॥ अतिरिक्तमितिं॥ अवश्यकक्षसन्नियतपूर्ववर्त्तिनएवकार्यसंभवेतद्भिन्नमन्यथासिद्धमित्यर्थः॥ अतएवप्रसक्तेमहत्त्वंकारणं॥ तेनअनेकद्रव्यवत्वमन्य

= अनेकद्रव्यसमवेतत्वं =

थासिद्धं। तत्रेहमरुत्समवायिकुसंगतेनानेकद्रव्यत्वमन्यथासिद्धं। नन्वेवं
परीक्षेकिंविनिगमकमितिवाच्यं। मरुत्वज्जातेः। कारणतावच्छेदकसलाघ
वात्। रासभादिस्थितिः। यद्येवंतद्घटव्यक्तिप्रतिरासभस्यनियतपूर्ववर्त्तित्वम
स्तितथापिघटजातीयघटांतरंप्रतिसिद्धकारणाभावेर्दंडादिसिरेवतद्व्यक्तेर
पिसंभवेरासभोन्यथासिद्धइतिभावः। एतेस्थितिः। एतेषुपंचस्वन्यथासिद्धेषु
मध्येपंचमोन्यथासिद्धआवश्यकः। तेनैवपरेषांचरितार्थत्वात्। तथाहि।
दंडादिसिरेवद्रव्यकुसंनियतपूर्ववर्त्तिसिरेवदंडत्वादिकमन्यथासिद्धं। न
न्वेवंपरीक्षेकिंविनिगमकमितिवाच्यं। दंडत्वस्यकारणत्वेदंडघटित १०

कालिकविशेषणतान्यसंबंधेनतद्वृत्तिमत्वेमितिपरमार्थः तेनसमवायस्यसमवायेना
वृत्तावपि

परंपरायाःसंबंधत्वेगौरवात्। एवमन्येषामनेनैवचरितार्थत्वंसंभवति। गुणकर्मेति। नसंतिः५
असमवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्यं। नतुगुणकर्मणोःसाधर्म्यमित्यत्रापि
तात्पर्यं। अथवाअसमवायिकारणावृत्तिसत्ताभिन्नजातिमत्वंतदर्थः। तेनज्ञा
नादीनामसमवायिकारणत्वविरहेनाव्याप्तिः। अन्यत्रेति। नित्यद्रव्याणिपरमा
णवाकाशादीनिविरुद्धयंपंचानांअश्रितत्वंसाधर्म्यमित्यर्थः। आश्रितत्वंतुसमवा
६ यसंबंधेनवृत्तिमत्वं। विशेषणतयानित्यानामपिकालादौवृत्तेः। इदानींद्रव्य
स्यैवविशेषसाधर्म्यवक्तुमुपक्रमते। क्षित्यादीनामिति। क्षितिर्जलमिति।
पृथिव्यंभोवायुमनसांपरत्वमपरत्वंमूर्त्तत्वंक्रियावत्वंवेगवत्वंचसाधर्म्यं।

न च यत्र घटादौ परस्व[illegible]मपरत्वं वा नास्ति तत्र व्याप्तिरिति वाच्यं। परत्वादि
समानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्त्तत्वमपकृष्टपरि
माणवत्त्वं। तच्चैतेषामवगाहनादियोग्यपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्। पूर्व
वत्कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं। वेगवद्वृत्तिद्रव्यत्व
व्याप्यजातिमत्त्वं बोध्यं। कालेति। कालाकाशात्मदिशोऽसर्वगतत्वं सर्वमूर्त्तसं
म योगित्वं। परममहत्त्वं च। परममहत्त्वं च जातिविशेषः। अपकर्षानाश्रयप त्वं
रिमाणत्ववान्। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं। तच्च बहि
रिंद्रियग्राह्यविशेषगुणवत्त्वं। अत्र ग्राह्यत्वं लौकिकप्रत्यक्षेस्वरूपयोग्यत्वं को

ष

११

ध्यं। तेन ज्ञातोघटस्तिप्रत्यक्षेज्ञानस्याधुनीतनानविषयत्वात्तद्वृत्तिरात्मनिना
स्तिव्याप्तिः। नवा प्रत्यक्षाविषयरूपादिमत्त्वं परमाणादावव्याप्तिः। तस्यापियो
ग्यत्वान्महत्त्वलक्षणकारणद्वितरासन्निधानान्नप्रत्यक्षं। अथवा आत्मावृत्तिविशेषगु थ
णवत्त्वं तत्त्वं। चत्वारीति। पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वं द्रव्यारंभकत्वं। पृथिव्य
प्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं। नच द्रव्यानारंभकेषु घटादावव्याप्तिः। द्रव्यसम
वायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आकाशमशरीरिणा
मितिं। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणोवत्त्वं। आकाशस्यवि
शेषगुणः श्रोत्रं। सचाव्याप्यवृत्तिः। यदाकिंचिदवच्छेदेनश्रोत्रसंयुक्त

= लक्षणद्वये तात्पर्यं अन्यथैकस्यैव्यर्थ्यस्यादितिभावः ॥ ५ =

तेतदान्यवच्छेदेनतदभावस्यापिसत्वात्क्षणिकत्वंचतृतीयक्षणवृत्तित्वंसप्रति योगित्वं ॥ योग्यविशेषगुणानास्योत्तरवर्त्तिगुणानाश्रयत्वात् ॥ प्रथमश्रोत्रस्यद्वितीय श्रोत्रेणनाशः ॥ एवंज्ञानादीनामपिज्ञानादिकंस्वात्मनिष्ठोयोजातीयावच्छेदेनास दे वतेः ॥ घटाद्यवच्छेदेनतदभावोस्त्येव ॥ एवंज्ञानादीनामपिक्षणद्वयावस्थायि त्वं ॥ ईदृक्चाव्याप्यवृत्तिविशेषगुणवत्वं ॥ क्षणिकविशेषगुणवत्वंचार्थः ॥ पृथि व्यादौरूपादिविशेषगुणोस्तीतिअव्याप्यवृत्तीरुक्तं ॥ पृथिव्यादौअव्याप्यवृ त्तिः संयोगादिरस्तीतिविशेषगुणइरुक्तं ॥ नचरूपादीनामपिकदाचित्तृती यक्षणेनाशसंभवात्क्षणिकविशेषगुणवत्वंक्षतिरावतिव्याप्तिरितिवाच्यं ॥ १२

= चतुःक्षणवृत्तिजन्यावृत्तिजातिमत्त्वादित्यर्थः ॥ ६ =

चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्वस्यतदर्थत्वात् ॥ अपेक्षाबुद्धिःक्ष णत्रयंतिष्ठति ॥ क्षणचतुष्टयंनकिमपिज्ञानादिकंतिष्ठतिरूपत्वादिकंतुक्षणच तुष्टयस्थापिन्यपिरूपादौवर्त्ततइतिदूषणं ॥ ईश्वरज्ञानस्यचतुःक्षणवृत्ति तित ३
त्व स्वात्मज्ञानस्यतद्वृत्तित्वाज्जन्येसुक्तं ॥ यदाकोऽहंजीवात्मनोःसाधर्म्यंतदाजन्येति नदेयं ॥ द्वेषत्वादिकमादायलक्षणसमन्वयात् ॥ परममहत्त्वस्यतादृशगुण त्वाच्चतुर्थक्षणेद्वित्वादीनांनाशाभ्युपगमात् ॥ द्वित्वादीनामपितेर्थात्तद्वार णायविशेषेति ॥ त्रिक्षणवृत्तित्ववावाच्यं इच्छात्वादिकमादायातिलक्षण समन्वयात् ॥ रूपेति ॥ पृथिव्येजलंरूपवद्द्रवत्वनत्वं प्रत्यक्षविषयत्वं

चेत्यर्थः। नचचक्षुरादीनांभजकपालेस्वदेहरूपाणांश्यरूपवत्त्वेकिंमानमितिवाच्यं। तत्रापितेजस्त्वेनरूपानुमानात्। एवंवाय्वनीतपृथिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपानुमानंबोध्यं। नचघटादेर्द्रुतस्पर्शवर्णादिमत्तेजसिचद्रवत्वनत्वमव्याप्तमितिवाच्यं। द्रवत्वंहिद्रव्यत्वव्याप्यजातिमत्त्वसंविवक्षितत्वात्। घृतजतुप्रभृतिषुजलेषुद्रुतस्पर्शवर्णादितेजसिचद्रवत्वसत्त्वात्तत्रपृथिवीत्वादिसत्त्वादायसर्वत्रसमन्वयः। नचप्रसक्तविषयंपरमाण्वादावव्याप्तं। अस्तिव्याप्तंचरूपादिरितिवाच्यं। चाक्षुषप्रसक्तविषयद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्। आत्मन्यतिव्याप्ति

कारणायचाक्षुषेतिगुरुणीतिगुरुत्ववत्त्वंसंस्कारपृथिवीजलयोरित्यर्थः। नचघ्राणेंद्रियादीनांवाय्वनीतपार्थिवभागानांचरमादिमत्त्वेकिंमानमितिवाच्यं। तत्रापिपृथिवीत्वादिनातदनुमानात्। द्वयोरितिगृहीतेरित्यर्थः। नचनैमित्तिकद्रवत्वंघटादावव्याप्तमितिवाच्यं। नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्। आत्मानइतिगृहीतेरित्यस्यैवाकाङ्क्षात्मनांविशेषगुणवत्त्वमित्यर्थः। यदुक्तमितिगृहीतेरित्यादिकंविवृणोतिबोध्यं। तन्नकस्यापिवैधर्म्यकेवलान्वयित्वात्। तेचसंख्यादयःपंचरत्वेआकाङ्क्षेति। साधर्म्यवैधर्म्यनिरूप्यसंप्रतिप्रत्येकंपृथिव्यादिकंनिरूपयतिगृहीतेः। तत्रक्षितेरित्यादि

= गंधसमवायिकारणतावच्छेदकपृथिवीत्वजातेस्तत्रानुपगमेः३

नागंधहेतुरिति॥ गंधसमवायिकारणमित्यर्थः॥ यद्यपि गंधवत्त्वमात्रलक्षणमुच्यते॥ तथापि पृथिवीत्वजातेरप्रमाणेापन्यासायकारणत्वमुपन्यस्तं॥ तथाहि॥ पृथिवीत्वं हि गंधसमवायिकारणतावच्छेदकतयासिद्ध्यति॥ अन्यथा गंधत्वावच्छिन्नौकस्मिकत्वापत्तेः॥ नचपाषाणादौ गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यं॥ तत्रापि गंधसत्त्वादनुपलब्धिसत्त्वेनानुत्कटत्वेनाणुपपत्तेः॥ कथमन्यथा तद्द्रव्यनिगंधउपलभ्यते॥ भस्मनोहि पाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वंसिद्ध्यति॥ यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतत्तदुपादानोपादेयमितिव्याप्तेः॥ दृष्टंचैतत्तंडपेटमलपटध्वंसजन्ये॥ इदंच पाषाणपरमाणोः पृथिवीत्वाभ्युपगमे॥ = अनुगतकारणप्रयोज्यत्वं॥ ॥१४॥

पिपृथिवीत्वं॥ तथाचतस्यापिगंधत्वेबाधकाभावः॥ नानारूपेति॥ शुक्लनीलादिभेदेननानाजातीयंरूपं पृथिव्यामेववर्त्ततेः॥ नतुजलादौ तत्रशुक्लत्वेवसत्तात्॥ पृथिव्यांतु एकस्मिन्नपिधर्मिणिपाकजेनानारूपसंभवात्॥ नचयत्रनानारूपंनोपलभ्यंतत्रव्याप्तिः॥ रूपद्रव्यवदवृत्तिद्रव्यसाक्षात्व्याप्यजातिमत्त्वंरूपनाशवदवृत्तिद्रव्यत्वसाक्षात्व्याप्यजातिमत्त्वंवानानारूपवत्त्वमितिलक्षणार्थस्यवाच्यत्वात्॥ वैशेषिकमतेपिपृथिवीपरमाणोरूपनाशस्यरूपांतरस्यचाविद्यमानत्वात्॥ न्यायनयेघटादावपितल्लक्षणसमन्वयः॥ षड्विधइति॥ मधुराम्लकषायादिभेदेनषड्विधरसः॥ पृथिव्यामेव॥ जलेमधुरएवरसः॥ अत्रापिपूर्ववद्रसद्रव्यवदवृत्ति

द्रव्यत्वसाक्षात्व्याप्यजातिमत्त्वं लक्षणार्थो वाच्यः॥ गंधस्त्विति॥ द्विविध इति वस्तुस्थि
तिमात्रं॥ नतु द्विविधगंधवत्त्वमिति लक्षणं॥ द्विविधत्वस्य व्यर्थत्वात्॥ द्विविध्यं चसौ
रभासौरभभेदेन बोध्यं॥ स्पर्शइति॥ तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायो
र्पिवर्त्ततइत्युक्तं पाकजइति॥ इत्थं चपृथिव्याः स्पर्शोऽनुष्णाशीतइति ज्ञापनार्थं
तदुक्तं पाकजस्पर्शवत्त्वमात्रं लक्षणेऽग्न्यिकस्येवेत्यर्थात्॥ पाकजस्पर्शोयद्यपि
पटादौनास्तितथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वसाक्षात्व्याप्यजातिमत्त्वमित्यर्थोबो
ध्यः॥ नित्येति॥ सापृथिवी द्विविधानित्याऽनित्याचेत्यर्थः॥ अणुलक्षणापरमा
णुरूपापृथिवीनित्या॥ तदन्यापरमाणुभिन्नाद्व्यणुकादिसर्वाऽनित्येत्यर्थः॥ ॥१५॥

=अवयविव्यवहारस्य

सेवानित्यापृथिव्यवयववतीत्यर्थः॥ ननुवयवित्वंनिष्किमानं॥ परमाणुपुंजेनैवोपपत्तेः॥
नचपरमाणुनांमतींद्रियत्वाद्घटादेःप्रत्यक्षंनस्यादिति वाच्यं॥ कैश्चित्परमाणोरप्र
त्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वात्॥ यथारूक्षस्यकेशस्यदूरेऽप्रत्यक्षत्वेपितत्स
मूहस्यप्रत्यक्षत्वं॥ नचरूक्षःस्थूलोघटइतिबुद्धेरनुपपत्तिरिति वाच्यं॥ एकोम
हान्घान्यराशिरितिवदुपपत्तेः॥ परमाणोरतींद्रियत्वेनतत्समूहस्यापिप्रत्य
क्षत्वायोगात्॥ दूरस्थकेशस्तूनातींद्रियःसन्निधानेतस्यैवप्रत्यक्षत्वात्॥ नच
तदानींदृश्यपरमाणुपुंजस्यासन्नत्वान्नप्रत्यक्षत्वेपिविरोधइति वाच्यं॥अ
दृश्यस्यदृश्यानुपादानत्वात्॥ अन्यथाचक्षुरूपादिसंततौकदादृश्यत्वप्र= अदृश्य
स्यदृश्ये
पादानत्वे।

संगात्॥ नचास्तितस्यतेलादौकथमदृश्यद्रुनसंततेर्दृश्यद्रुनोत्पत्तिरितिवाच्यं॥
तत्रतदंतःपातिदृश्यद्रुनावयवैःस्थूलद्रुनोत्पत्तेरुपगमात्॥ नचादृश्येनघणुके
नकथंदृश्यत्रसरेणूत्पत्तिरितिवाच्यं॥ येतानवयवदृश्यत्वमदृश्यत्वंवाकस्यचित्स्वभा
वादाचक्ष्महे॥ परंतुमहत्त्वाद्भूतरूपादिकारणसमुदायवत्त्वात्तदृश्यत्वंतदभावेचादृश्य
त्वं॥ त्रसरेणोर्महत्त्वात्प्रत्यक्षं॥ नतुद्व्यणुकादेस्तदभावान्नहितन्मतेपीदंसंभवति॥
परमाणोर्महत्त्वाभावात्॥ इत्थंचावयविसिद्धेस्तेषामुत्पादविनाशयोःप्रत्यक्षसिद्धत्वा
दनित्यत्वं॥ तेषांचावयवावयवधारयाअनंतत्वेमहत्परमाण्वोरपिसाम्यप्रसंगः
अतःकुत्रचिद्विश्रामोवाच्यः॥ यत्रविश्रामस्तन्नित्यंसमवेतकार्योत्पत्ति
संगादितिनित्यं॥ महत्परिमाणंतारतम्यंगगनादौविश्रांतंक्वचिदवणुप

म्य

रिमाणतारतम्यस्यापिक्वचिद्विश्रांतत्वमस्तीतितस्यपरमाणुत्वसिद्धिः॥ नचत्रस
रेणावेवविश्रामोस्त्वितिवाच्यं॥ त्रसरेणुःसावयवःचाक्षुषद्रव्यत्वाद्घटवदित्यनु
मानेनतदवयवसिद्धेस्त्रसरेणोरवयवाःसावयवाःमहदवयवत्वात्कपालवदि
त्यनुमानेनतदवयवसिद्धिः॥ नचेदमप्रयोजकं॥ अपकृष्टमहत्त्वप्रतियोगिक
द्रव्यत्वस्यैवप्रयोजकत्वात्॥ नचैवंक्रमेणतदवयवधारापिसिद्ध्येदितिवाच्यं॥ अनवस्थाभयेनतदसिद्धेरितिं॥ साचत्रिधेतिं॥ साकार्यरूपाएवि
थिवीत्यर्थः॥ शरीरेंद्रियविषयभेदादितिसूत्रार्थः॥ तत्रेदमुद्धरंतिं॥ यो
निजादिरितिं॥ योनिजंमयोनिजंचेत्यर्थः॥ योनिजमपिजरायुजमं

जरायुजं मानुषादीनां। अंडजं सर्पादीनां। अयोनिजं स्वेदोद्भिजादि
कं। स्वेदजाः क्रिमिदंशा ः। उद्भिजास्तरुगुल्मादयः। नारकाणां शरीरमपि
अयोनिजं। नच मानुषादिशरीराणामार्थिवत्वे किं मानमिति वाच्यं। गंधा
दिमत्त्वेव प्रमाणत्वात्। नच कूपोदकादेरुपलंभादाप्यत्वादिकमपि स्यादि
ति वाच्यं। तथा च सति जलत्वपृथिवीत्वादिना संकरप्रसंगात्। नच तर्हि ज
लत्वादिकमेवास्तु नतु पार्थिवत्वमिति वाच्यं। कूपादीनां विनाशेपि तच्छ
रीरत्वेन प्रत्यभिज्ञानात्। गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। एतेन पा
र्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यं। शरीरत्वं तु नजातिः।

= ननु जलत्वपृथिवीत्वाभ्यां शरीरमभिन्नमेवेति जलादिकमपि स्यादतआह प्रत्यभिज्ञानादिति ३= १८

वी

पृथिव्यादिनासांकर्यात्। किंतु चेष्टाश्रयत्वं। वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्या
प्तिः। नच वृक्षादेः शरीरत्वे किं मानमिति वाच्यं। आध्यात्मिकवायुसंबंधस्य प्रमाण
त्वात्। तत्रैव किं मानमिति चेद्वृक्षस्य तत्संरोहणादिना तदुन्नयनात्। यद्धि स्वा
दौ शरीरे व्यवहारो न भवति। तदवयवित्वेन विशेषणीयं। नच यत्र शरी
रे चेष्टा नजाता तत्राव्याप्तिरिति वाच्यं। तादृशप्रमाणाभावात्। अथवा
चेष्टावदवयविमात्रवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तन्मानुषत्वचैत्रत्वादि
जातिमादायलक्षणसमन्वयः। नचनृसिंहशरीरे कथं लक्षणसमन्वयः।
तत्रनृसिंहत्वैक्यशक्तिवृत्तितयाजातित्वाभावात्। जलीयतेजसशरी

त

रवृत्तितयादेवत्वस्यापिजातित्वाभावादितिवाच्यं। कल्पभेदेननृसिंहशरीर
स्यनानात्वेननृसिंहत्वजातेरलक्षणसमन्वयः। इंद्रियमिति। घ्राणेंद्रियपार्थि
वमित्यर्थः। पार्थिवत्वंकथमितिचेदुच्यते। घ्राणेंद्रियंपार्थिवंरूपादिषुपंचसु
मध्येगंधस्यैवाभिव्यंजकत्वात्। कुंकुमगंधाभिव्यंजकगोघृताद्देवत्वं।
स्वकीयरू नचदृष्टांतेरूपादिव्यंजकत्वादसद्धेतुरितिवाच्यं। परकीयरूपाद्यव्यंज
पादि५ कत्वतदर्थत्वात्। नचनवशरावगंधव्यंजकजलेनानेकांतिकमितिवा
च्यं। तस्यसंस्कारार्थत्वात्। यद्वापरकीयेतिनेदंयं। वायूपनी
तकुंकुमभागस्यदृष्टांतत्वसंभवात्। नचघ्राणेंद्रियसन्निकर्षस्यगंध

१८

=ननुघटादेःसाक्षादुपभोगसाधनत्वाद्विषयत्वंनस्यादतआहसर्वमेवहि
ति २न

मात्रव्यंजकत्वात्तत्रव्यभिचारइतिवाच्यं। द्रव्यत्वेसतीतिविशेषणात्। विषयइति।
उपभोगसाधनंविषयः। सर्वमेवहिकार्यजातंअदृष्टाधीनयच्चकार्ययदृ
ष्टाधीनंतत्तदुपभोगसाक्षात्परंपरयावाजनयत्येव। नहिबीजप्रयोजनाभावे
नाकस्यविदुषस्तिरस्तिं। तेनघ्यणुकादिकंब्रह्मांडांतंसर्वमेवविषयोभवति। श
रीरेंद्रियविषयेष्वपिप्रकारांतरेणोपन्यासःक्षिप्रबुद्धिवेद्यार्थं। जलं
निरूपयतिं। वर्णशुक्लइतिं। स्नेहसमवायिकारणतावच्छेदकतयाज ल
त्वंजातिःसिध्यतिं। यद्यपिस्नेहंनित्यवृत्तितयानकार्यतावच्छेदकंत
थापिजन्यस्नेहंतथाबोध्यं। अथयत्रमाणेजलत्वंनस्यात्तत्रजन्यस्नेहाभा

=साक्षात्संबं
=धेनघटा
दिकंघ्यणुका
दिकंपरंपर
या=२

=अभास्वरशुक्लादितरत्तरूपनीलपीतादिकंभास्वरशुक्लंचतदसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसा
=क्षात्व्याप्याजातिर्जलत्वमेवतद्वत्त्वस्यसर्वत्रसत्वात्॥ = ५

१९

वात्॥ तस्यचनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्न॥ जन्य
स्नेहजनकतावच्छेदिकायाः जन्यजलत्वजातेःसिद्धेस्तेनैवाश्रयतावच्छेदकतया = जन्यजला
जलत्वजातिसिद्धेः॥ शुक्लरूपमेवजलस्यतिदशीयितुमुक्तंवर्णःशुक्लइतिन श्रयता २
तुशुक्लरूपवत्त्वंलक्षणं॥ अथवानैमित्तिकद्रवत्ववदवृत्तिशुक्लरूपवद्वृत्ति
द्रव्यत्वसाक्षात्व्याप्यजातिमत्वं॥ अथवाअभास्वरशुक्लेतररूपासमाना
धिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वंतदर्थः॥ रसस्पर्शावि
ति॥ जलस्यमधुरएवरसः॥ शीतएवस्पर्शः॥ तिक्तावृत्तिमधुरवृत्तिद्र
व्यत्वसाक्षाद्व्याप्यजातिमत्वं॥ ननुशुक्लरूपमेवकुतः॥ कालिंदिजलादौनी

= द्रव्यत्वव्याप्याव्याप्यत्वेसतिद्रव्यत्वव्याप्यत्वं द्रव्यत्वसाक्षाद्व्याप्यत्वं॥ ३

१९

लिमोपलब्धेरितिचेन्न॥ नीलजनकतावच्छेदिकायाः एथिवीजातेरभावात्॥ जले
नीलरूपासंभवात्॥ कालिंदिजलेनीलत्वप्रतीतिस्त्वाश्रयोपाधिकी॥ अतएवदि
यतिरिक्तेपथवल्लिमोपलब्धेः॥ अथजलेमाधुर्यंकुमानं॥ नहिप्रत्यक्षेणको
पिरसस्तत्रानुषज्यते॥ नचनारिकेलादौमाधुर्यमुपलभ्यतएवेतिवाच्यं॥ त
स्याश्रयोपाधिकत्वात्॥ अन्यथाजंबीरकरीरसादावुपलभेरम्लादिकमपि
स्यादितिचेन्न॥ हरितक्यादिभक्षणस्यजलरसव्यंजकत्वात्॥ नचहरितक्या
मेवजलोष्मसंयोगाद्रसांतरोत्पत्तिरितिवाच्यं॥ कल्पनागौरवात्॥ एथिवीत्वस्या
म्लादिजनकतावच्छेदकत्वाच्चजलेनाम्लादिकं॥ जंबीरसादौतदाश्रयोपाधि

की तथा प्रतीतिः॥ एवं जन्यशीतस्पर्शीयजनकतावच्छेदकं जन्यजलत्वं बो
ध्यं॥ घृष्टचंदनादौ तु शीतोपलब्धेश्चंदनांतर्वर्तिशीतस्पर्शीयसलिलस्य॥
तेजःसंयोगाज्जलेऽप्युष्णस्पर्शप्रतीतिरोपाधिकी स्फुटैव॥ तत्रापाकासंभवात्॥स्नि
ग्धस्तत्रेति॥ घृतादावर्पितदंतर्वर्तिजलस्यैवस्निग्धः॥ जलस्यस्निग्धसमवा
इति यिकारणत्वात्॥ तेनजलेएवस्नेहंतव्यं॥ द्रव्यत्वमिति॥ सांसिद्धिकद्र
वत्वसजातिविशेषः प्रत्यक्षसिद्धः॥ तदवच्छिन्नजनकतावच्छेदकमर्पितं = जलत्वमेवे
देवेतिभावः॥ तैलादावर्पिजलस्यैवद्रवत्वस्नेहप्रकर्षेण दहनानुकूलस्य सर्थः ६=
मितिवक्ष्येते॥ प्रथमवर्हितिः॥ एथिव्याइवसर्थः॥ तथाहिजलंविद्विधं॥

२०

नित्यमनित्यंच॥ परमाणुरूपंनित्यं॥ द्व्यणुकादिकंसर्वमनित्यं॥ अवयवसमवेतं॥ अ
वि नित्यमपिस्त्रियं॥ शरीरेंद्रियविषयभेदात्॥ एथिवीतोयाविशेषस्तमाहुः॥ कस्मि
तिं॥ अयोनिजमितिं॥ अयोनिजमेवेसर्थः॥ जलीयंशरीरमयोनिजंवरुणलो
केप्रसिद्धमितिं॥ इंद्रियमितिं॥ इंद्रियंरसनंजलीयमित्यर्थः॥ तथाहिं॥ रसनंज
लीयंं॥ गंधाव्यंजकत्वेसतिरसव्यंजकत्वात्॥ सक्तुरसादिव्यंजकोदकवत्॥ र
सनसंन्निकर्षेव्यभिचारवारणायद्रव्यत्वेदेयं॥ विषयंदर्शयतिं॥ सिंधुर्हिमादि
रितिं॥ सिंधुःसमुद्रः॥ हिमंतुषारः॥ आदिपदात्सरित्कासारकरकादिः सर्वो
पिग्राह्यः॥ नचहिमकरकयोः॥ कठिनस्पर्शोर्थिवस्वमितिवाच्यं॥ उष्म

= करकापृथिवीकठिनस्पर्शीयस्वाद्घटवदिति ८

णाविलीनयोस्नेयोजलस्यप्रसक्षसिद्ध्यात्॥ यद्द्रव्ययद्द्रव्यध्वंसजन्यंतद्द्रव्यं त
द्द्रव्योपादानोपादेयमितियासेर्जलोपादानोपादेयत्वसिद्धेः॥ अदृष्टविशेषेणद्रव
स्वप्रतिरोधाकरकायोत्कृष्टिन्यप्रसयस्यात्रांतत्वात्॥ तेजोनिरूपयतिः॥स्पर्शोउ
ष्णइत्यादिः॥उष्णत्वंस्पर्शोनिष्ठोजातिविशेषःप्रसक्षसिद्धः॥इहंचजन्योष्णस्प
र्शोसमवायिकारणतावच्छेदकंतेजस्त्वंजातिविशेषः॥ तस्यपरमाणुवृत्तित्वंज
लस्येवानुसंधेयंः॥नचोष्णस्पर्शोवत्वंचंद्रकिरणादावव्याप्तमितिवाच्यं॥त
त्रोष्णोष्णयस्यसत्वात्॥ किंतुतदंतःपातिजलस्पर्शोणाभिभवादग्रहः॥ए
वंरत्नकिरणादौचपार्थिवस्पर्शोनाभिभवाच्चक्षुरादौचानुद्भूतत्वादग्रहः॥

=ननुचंद्रकिरणादौयदिउष्णस्पर्शोतदाग्रहःस्यादतआहकिं
स्थिति२= २१

रूपमित्यादिः॥ वैश्वानरेमरकतकिरणादौचपार्थिवरूपेणाभिभवाच्चक्षुरग्रहः॥
तद्रूपाग्रहधर्मेणापिचाक्षुषत्वंनस्यादितिचेन्नः॥अन्यदीयरूपेणैवधर्मिणो
ग्रहसंभवात्॥शोणस्यैवपित्तपीतीमानः॥ वैद्रूप्यंशुक्लरूपंनाभिभूतंः॥किंतुतदीय
शुक्लत्वमभिभूतमित्यन्यः॥नैमित्तिकमितिः॥ रूपवत्वादिरूपेतेजसितत्सत्वात्॥
नचनैमित्तिकद्रवत्वंदहनादौऽव्याप्तंघृतादौऽतिव्याप्तमितिवाच्यं॥ पृथिव्यवृ
त्तिनैमित्तिकद्रवत्वंद्रवत्वसाक्षाद्व्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥ पू
र्ववदितिः॥जलस्यैवेत्यर्थः॥ तथाहिः॥ तद्द्विविधंनित्यमनित्यंचः॥ परमाणुरू
पंनित्यंतदन्यदनित्यं॥ अवयविचः॥ तच्चत्रिविधंः॥ शरीरेंद्रियविषयभे

दात्॥ शरीरमयोनिजमेवसूर्यलोकेप्रसिद्ध॥ अन्नयोविशेषस्तमारु॥ इंद्रियमि
ति॥ चक्षुस्तेजसमिति॥ परकीयस्पर्शाद्यव्यंजकत्वेसतिपरकीयरूपव्यंजकत्वात्
दीपवत्॥ प्रदीपस्यस्वीयस्पर्शव्यंजकत्वादाद्यपरकीयेति॥ घटादेःस्वीयरूपव्यंज
कत्वाच्चक्षुषिचारवारणायद्वितीयंपरकीयेति॥ अथवाप्रमाद्दृष्टांतत्वंसाधादाद्यं
परकीयेतिनदृष्यांचक्षुसन्निकर्षेव्यभिचारवारणायद्रव्यत्वंदेयं॥ विषयंदर्शय
ति॥ यद्धीति॥ ननुसुवर्णस्यतेजसत्वेकिमानेमितिचेन्न॥ सुवर्णंतेजसं॥ अस
तिप्रतिबंधकेऽसंतानलसंयोगेपिअनुच्छिद्यमानद्रवत्वाध्यिकरणत्वात्॥
यन्नैवंतन्नैवंयथापृथ्वीति॥ नचाप्रयोजकं॥ पृथ्वीद्रवत्वंस्यजलद्रव

त्वस्यवाऽग्निसंयोगनाश्यत्वात्॥ ननुपीतिमगुरुत्वाश्रयस्यपार्थिवस्यापितदानी
द्रवत्वात्तेनव्यभिचारइतिचेन्न॥ जलमध्यस्थमपीक्षोदवत्तस्याद्रवत्वात्॥ अ
परेतु॥ पीतिमाश्रयस्यअग्निसंयोगेपिरूपापरावृत्तिदर्शनात्॥ तत्पतिबंध
कंविजातीयंद्रवत्वंकल्प्यते॥ तथाहि॥ अग्निसंयोगेपितिमगुरुत्वाश्रयःविजा
तीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः॥ असंताग्निसंयोगेपिपूर्वरूपविजा
तीयरूपेनाधिकरणत्वात्॥ तत्सजलमध्यस्थपीतपटवत्॥ तस्यचपृथि
वीजलभिन्नस्यतेजस्त्वंनियमात्॥ वायुंनिरूपयति॥ अपाकजइति॥ अ
नुष्णाशीतस्पर्शस्यपृथिव्यामपिसत्वादतउक्तंअपाकजइति॥ अपाक

जस्पर्शीस्यज्जलादावपिसास्वादतउक्तंअनुष्णाशीतस्पर्शइति। एतेनवायवीयोवि
जातीयस्पर्शोदर्शितः। तज्जनकतावच्छेदकमपिवायुस्त्वमितिभावः। एषःवा
युःस्पर्शोहिलिंगकःवायुर्हिद्रव्यत्वेसतिस्पर्शवत्वेनानुमीयतेविजातीयस्पर्शोनवि
लक्षणस्पर्शेनतृणादीनांधूमेनाङ्गारादीनांकेनचिद्वायोरुन्नयनात्। यथा
चवायुर्नप्रत्यक्षस्तथाग्रेवक्ष्यते। पूर्ववदिति। वायुर्द्विविधोनित्योऽनित्य
श्च। परमाणुरूपोनित्यः। तदन्योऽनित्यः। समवेतव्यः। सोपित्रिविधः।
शरीरेंद्रियविषयभेदात्। तत्रशरीरमयोनिजमेवपिशाचादीनांप
रंतुजलीयतेजसवायवीयशरीराणांपार्थिवभागोपष्टंभादुपभो

गक्षमत्वंजलादीनांप्राधान्याज्जलादिकमपिअन्नयोविशेषस्तमाहुः देहु
व्यापितिशरीरव्यापकंस्पर्शग्राहकत्वात्। तच्चवायवियंरूपादिषुपंचसु
मध्येस्पर्शस्यैवाभिव्यंजकत्वात्। अंगसंगिसलिलशीतास्पर्शाभिव्यंजकव्य
जनकंविषयदर्शयतिप्राणादिरितिआकाशंनिरूपयतिआकाशस्येति आकाशकालदिगात्मसुएकैकव्यक्तिकत्वादाकाशत्वेनजातिःआ
काशत्वंशब्दाश्रयत्वंवैशेषिकइति। तत्कथनंतुविशेषगुणांतरवच्चेदायएतेनप्रमाणमपिदर्शितं। तथाहि। शब्दोगुणःचक्षुग्रे
णायोग्यबहिरिंद्रियग्राह्यजातिमत्वात्। स्पर्शवत्। शब्दःद्रव्यसम

Dr. BHAU DAJI LAD MUSEUM

वेतःगुणत्वात्इत्यनुमानेनशब्दस्यसमवेतत्वसिद्धेः।शब्दोनस्पर्शवद्भि
न्नोषगुणः॥अग्निसंयोगासमवायिकारणकत्वाभावेसतिअकारणगुण पू
र्वकप्रत्यक्षत्वात्।सुखवत्।जलपरमाणुरूपादेर्व्यभिचारवारणायप्र
त्यक्षेति।अग्निसंयोगजघटरूपेव्यभिचारवारणायसत्येति।शब्दःन
नदिक्कालमनोगुणःविशेषगुणत्वात्नात्मविशेषगुणःबहिरिंद्रिययोग्य
त्वात्॥रूपवत्।इहचशब्दाधिकरणनवमद्रव्यंगगनमेकंसिद्धंभवति।न
च्यवाप्यवयवेषुसूक्ष्मशब्दक्रमेणकार्योत्पत्तिकारणगुणपूर्वकःशब्दउत्पद्यता मि
तिवाच्यं।अप्रत्यक्षद्रव्यगतविशेषगुणत्वाभावात्।तत्रचशब्दोमू

स्यविषयस्यचाभावादिंद्रियंदृश्यतिं।इंद्रियमितिं।ननुकाशलाघवादेकंसि
द्धं श्रोत्रंपुरुषेदक्षिन्नंकथमाकाशस्यादतआहुं।एकःसन्नपीतिं।आका
शएकःसन्नपिउपाधिःकर्णशष्कुल्याःभेदक्षिन्नंभिन्नंश्रोत्रंभवतीत्यर्थः।का
लंनिरूपयतिं।जन्यानांजनकइतिं।तत्रप्रमाणंदर्शयितुमाहुं।जगता
माश्रयइतिं।इदानींघट इतिप्रतीतिःसूर्यपरिस्पंदादिकमपिविषयीकरो
तितदासूर्यपरिस्पंदादिनाघटादिःसंबंधोवाच्यः।सचसंयोगादिर्नभवती
तिकालएवसंबंधघटकःकल्प्यतें।इहचतस्याश्रयंसम्यक्कुं।प्रमा
णांतरंदर्शयतिं।परापरस्येतिं।परत्वादिबुद्धेरसाधारणंनिमित्तंका

=युवानमधिकृत्य मानेस्थविरे परत्वंसामवायिकारणकंनावकार्यत्वात्॥ घ[illegible]ट
=वत्॥ इत्यनुमानेनसमवायिकारणंकिंचिदस्तीतिविज्ञायते॥ तच्चसमवायिकारणंनरू
पादिव्यभिचारात्नाविशेषगुणोविशेषगुणसंयोगश्चेत्लाघवादतिरिक्तःकल्पतइतिभावः॥ नन्वेकस्यकालस्यसिद्धेक्षणादिनमासवर्षादिसमयभेदोन स्यादतआह॥ क्षणादीति॥ कालस्तिकेपिउपाध्यिभेदात्क्षणादिव्यवहारविषयः॥ उपाध्यिस्तुस्वजन्यविभागप्रागभावावच्छिन्नकर्म॥ पूर्वसंयोगावच्छिन्नविभागोवा॥ पूर्वसंयोगनाशावच्छिन्नउत्तरसंयोगप्रागभावोवा॥ उत्तरसंयोगावच्छिन्नंकर्मका॥ नचोत्तरसंयोगानंतरक्षणव्यवहारोनस्यादितिवाच्यं॥ कर्मोत्तरसत्वादिति॥ महाप्रलयेक्षणादिव्यवहारोयद्यपिस्तितदानायसाध्वंसेनैवोपपादनीयइति॥ दिङ्निरूपयति॥ दूरा

स्तिकेति॥ दूरस्थमतिकस्यचदैशिकपरत्वमपरत्वंचबोध्यं॥ तद्धेतुरसाधारणंबीजंदिगवा॥ दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाम्रियतयादिकृसिध्यतीतिभावः॥ ननुएकैवेयंदिक्कथंदितदाप्राचीप्रतीच्यादिव्यवहारःकथमुपपद्यतामतआहोपाध्यिरिति॥ यस्पुरुषस्योदयगिरिसंनिहितायादिक्तत्पुरुषस्यसाप्राची॥ एवंउदयगिरिव्यवहिताचप्रतीची॥ एवंतत्पुरुषस्यसुमेरुसंनिहितादिगुदीची॥ तद्व्यवहिताअवाची॥ सर्वेषामेववर्षाणामेरूत्तरतःस्थितइतिनियमात्॥ आत्मानंनिरूपयति॥ आत्मेंद्रियेति॥ आत्मसंज्ञातत्सुखदुःखा

दिसमवायिकारणतावच्छेदकतयासिद्धेः। ईश्वरेऽपिसाजातिरस्ति।
एवमदृष्टादिरूपकारणाभावाच्चनसुखसाधुसृष्टेः। निसस्यस्वरूपयो
ग्यस्यफलावश्यंभावइत्यस्याप्रयोजकत्वात्। अपरेतुईश्वरेसाजातिर्ना
भा स्त्येवप्रमाणाभावात्। नचदृश्यमद्रव्यत्वापत्तेः। ज्ञानवत्त्वेनविशेषणा दि
त्याहुः। इंद्रियादीति। इंद्रियाणांशरीरस्यपरंपरयाचैतन्यसंपादकाः।
यद्यप्यात्मनिअदृसुखीत्यादिप्रत्यक्षंविषयत्वमस्त्येवतथापिविप्रति
पन्नंप्रतिप्रथमतएवशरीरादिभिन्नत्वंप्रतीतिगोचरइतिप्रति
पादयितुंनशक्यतइतःप्रमाणंदर्शयतिं। करणमितिं। वाक्या

=ननुमुक्तात्मनःशरीराभावान्नचैतन्यमितिचेन्मृतशरीरस्याप्रिप्राणाभावेनैवनचैतन्यमित्याहुः। प्रा
णाभावेनेति४=

दीनांछिदाकरणानांकर्त्तारमंतरेणफलानुपधानंदृष्टं। एवंचक्षुरादीना
मपिज्ञानकरणानांकर्त्तारमंतरेणफलोपनंनोपपद्यतातिरिक्तःकर्त्ताकल्प्य
तेः ननुशरीरस्यैवकर्तृत्वमस्त्वतआहुः। शरीरस्येति। ननुचैतन्यंज्ञाना
दिकमेवमुक्तात्मनोनास्त्वमृतशरीराणामपितदाभावकाक्षतिः। प्रा
णाभावेनज्ञानाभावस्यसिद्धेरितिचेन्नः शरीरस्यचैतन्येबाल्येविलो
=परिमाणभे कितस्यस्यापिरेस्मरणानुपपत्तेः। शरीराणामवयवोपचयापचयैरु
=दृव्यभे सादविनाशशालिनात्वात्। नचपूर्वशरीरोत्पत्तेनसंस्कारेणद्वितीय
=दः३= शरीरेसंस्कारउत्पद्यतइतिवाच्यं। अनंतसंस्कारकल्पनायागौर

वा तू० एवं शरीरस्यचैतन्ये बालकस्यैव प्रवृत्तिर्न स्यात् तू० इष्टसाधनता ज्ञा
नस्य तद्धेतुत्वात् तू० तदानीमिष्टसाधनतानुभवकाभावात् तू० मे तज्जन्मा म
तरानुभूतेष्टसाधनस्य तदानीं स्मरणादेव प्रवृत्तिः० न च जन्मांतरानु
भूतमन्यं तदपि स्मर्यते तदृतिवाच्यं० उद्बोधकाभावात् तू० अत्र स्तनाय
सा जीवनादृष्टमेवोद्बोधकं कल्प्यते० इदं च संसारस्यानादितयाआत्म
नोऽनादिभावस्य नाशसंभवान्नित्यत्वं बोध्यं० ननु चक्षुरादीनां ज्ञाना
दौ करणत्वं कर्तृत्वं चास्मदादेरोचे साधकाभावादतआह० तथास्मि
तिचैतन्यमित्यर्थः० उपघातेनाशे सति अर्थाच्चक्षुरादीनामेव० क

२७

थमिति० पूर्वं चक्षुषासाक्षात्कृतानां चक्षुरभावे स्मरणं नस्यात् तू० अनुभवितुर
नअनुभूत भावात् तू० अन्येनान्यस्य स्मरणासंभवात् तू० अनुभवस्मरणयोः सामानाधिकर
ण्येन कार्यकारणभावादितिभावः० ननु चक्षुरादीनां चैतन्यमास्तु नित्यस्यम
नस स्तु चैतन्यं स्यादतआह० मनोपीति० न तथा न चैतन्यं० ज्ञानादीति० म
नसोऽणुत्वात् तस्य चमहत्त्वस्य हेतुत्वात् मनसि ज्ञानस्मरणादि संतै तत्तत्सक्षा
नुपपत्तेरित्यर्थः० नन्वस्तु विज्ञानमेवात्मा तस्य प्रकाशहेतुत्वाच्चैतन्यं० ज्ञा स्य
नस्मरणादिकं तस्यैवाकारविशेषः० तस्यापि [illegible]भावत्वादक्षणिकत्वं० पू
र्वं पूर्वस्योत्तरविज्ञानहेतुत्वात्क्षणसंतानपालयविज्ञानधारा० बाधितैवमृ

गमदवासनायाः वसनइवपूर्वपूर्वविज्ञानजनितसंस्काराणांमुत्तरोत्तरविज्ञानेसं
क्रान्तत्वान्नानुपपत्तिःस्मरणादेरिचेन्न। तस्यजन्याद्विषयकत्वेसार्वज्ञापत्तिर्यकि
ञ्चिद्विषयत्वेविनिगमकाभावः। सुषुप्तावपिविषयावभासप्रसंगश्च। तदानी
निर्विषयकाञ्चित्संतिरनुवर्त्ततइतिचेन्न। तस्याःस्वप्रकाशत्वेप्रमाणाभा
वात्। अन्यथाघटादीनामपिज्ञानत्वापत्तिः। नचेष्टापत्तिर्घज्ञानव्यतिरि
क्तवस्तुनोऽभावादितिवाच्यं। घटादेरनुभूयमानस्यापलपितुमशक्य
त्वात्। अकारविशेषएवायंविज्ञानस्येतिचेत्तर्किमयमाकारोतिरिच्यतेविज्ञाना
त्तर्हिसमायातंविज्ञानव्यतिरिक्तेनानतिरिच्यतेचेत्तर्हिसमूलंबनेनीला

कारोपिपीताकारःस्यात्। स्वरूपतोविज्ञानस्याविशेषात्। अपीतरूपोनीलस्वा
दिर्विज्ञानधर्मइतिचेन्न। नीलत्वादीनांविरुद्धानामेकस्मिन्नसमावेशात्। इतरथा
विशेषावधारणस्यैवदुरुपपादत्वात्। नवासनासंक्रमःसंभवति। मातपुत्रयोर
पिवासनासंक्रमप्रसंगात्। नचोपादानोपादेयभावोनियामकइतिवाच्यं। वासना
यासंक्रमासंभवात्। उत्तरस्मिन्नुत्पत्तिरेवसंक्रमइतिचेन्न। तदुत्पादकाभावा
त्। चित्तमेवोत्पादकमेतदासंस्काराश्रयप्रसंगः। क्षणिकविज्ञानेस्थितिक्रिय
विशेषःकल्प्यतइतिचेन्न। मानाभावात्कल्पनागौरवाच्च। एतेनक्षणिकत्वा
देवचेतन्यमपिप्रत्युक्तं। गौरवादितिक्रियमाणाभावात्। बीजादावपिसहृ

DR. BHAU DAJI

कारिसमवधानासमवधोर्योगमेवोपपत्तेः कुर्वद्रूपस्याकल्पनात्॥ अस्तुतर्हिक्षणिक
विज्ञानमेवास्त्वित्यविज्ञानमेवात्मा॥ अविनाशीवैअयमात्मा॥ सत्यंज्ञानमनंतंब्र
ह्मेत्यादिश्रुतेश्चेतिचेन्न॥ तस्यसविषयत्वासंभवस्यदृष्टेतत्वान्निर्विषयस्यज्ञानस्वेमा
नाभावात्सविषयस्याप्यनुभवात्॥ अतोज्ञानमिन्द्रियंनिस्यआत्मेतिसिद्धं॥ सत्यंवि
ज्ञानमितिब्रह्मपरंजीवेषुनोपयुज्यते॥ ज्ञानाज्ञानस्वरूपत्वादिष्टिर्जीवानांभेदसि
द्धौस्फुटतरामीश्वरेभेदः॥ अन्यथाबंधमोक्षानुपपत्तेः॥ योहिईश्वरेभेदबोधको
वेदःसोपितदभेदेनतदीयंप्रतिपादयन्नेतीति॥ अभेदभावनयैवयतितव्य
मितिवदंति॥ अतएवसर्वंआत्मानःसमर्पिताइतिश्रूयते॥ मोक्षदशायामज्ञा

ननिवृत्तौअभेदोजायतइत्यपि॥ भेदस्यनित्यत्वेननाशायोगात्॥ भेदनाशोपिव्य
क्तिद्वयंस्थास्यत्येव॥ नचद्वित्वमपिनश्यतीतिवाच्यं॥ तवनिर्धर्मकेब्रह्मणिसत्ता
भावेपिसत्यस्वरूपंतद्धितवत्॥ द्वित्वासावेपिद्वयात्मकौतावस्तुसत्वचत्वात्॥ मिथ्या
त्वाभावोऽधिकरणात्मकस्तत्रसत्यत्वमितिचेत्॥ एकत्वासावाच्यव्यक्तिद्वयात्मकोद्वि
त्वमिसत्यंतं॥ प्रसेकमेकत्वेपिपृथिवीजलयोर्नगंधइतिवदुभयत्वैकमित्यस्या
पिसर्वत्रनसिद्धत्वात्॥ योपितदानींअभेदप्रतिपादकःआगमःसोपिनिर्दुरव
स्थादिनासाम्यप्रतिपादयति॥ संपदाधिक्येपुरोहितोयंराजावृत्तइतिवत्॥ अ
तएवनिरंजनःपरमंसाम्यमुपैतीतिश्रूयते॥ ईश्वरोपिनज्ञानसुखात्मकं
तुविज्ञानाश्रयःनित्यंविज्ञानमानंदंब्रह्मेत्यादौविज्ञापनेदेनज्ञानाश्रयत्व

सं

२० वोक्तः॥ यः सर्वज्ञइत्यनुरोधात्॥ आनंदमिस्यस्यापिअनंदवदित्यर्थः॥ आनं दोऽपिदुखाभावेउपचर्यते॥ भाराद्यपगमेसुखवीसंवृत्तोरुमितिवत्॥ अस्तुवा तस्मिन्नानंदोनस्वसावानंदः॥ असुखमितिश्रुतेः॥ नचैवंसुखंस्यादितिकु तोनार्थइतिचेन्न॥ क्लेशकल्पनापत्तेः॥ आनंदमित्यत्रमत्वर्थीयाच्चप्र त्ययविरोधाच्चेतिसंक्षेपः॥ एतेनप्रकृतिः कर्त्री पुरुषःपुष्करपलाशवन्नि र्लेपःकिंतुचेतनः कार्यकारणयोरभेदात्कार्यनाशेसतिकार्यरूपतयानो ऽपिस्याद्दिकारणंतंत्र॥ बुद्धिर्गतश्चैतन्याभिमानान्यथानुपपत्या तत्कल्पनं॥ बुद्धिश्चप्रकृतेः परिणामःसेवमुक्तस्वमैकरणमिष्यते॥

आर्षादि स्वान्मतर्थी याच्चप्रत्यया तु॥ अन्य थापुंल्लिंग त्वापत्तेः।

तः ३०

निर्देशो

तस्मात्त्वासत्त्वाभ्यांपुरुषस्यसंसारापवर्गौ॥ तस्यैवइंद्रियप्रणालिकयापरिण त्तिर्ज्ञानरूपाद्यादिनापुरुषस्यसंबंधः॥ पुरुषकर्तृत्वाभिमानोबुद्धेश्चैतन्याभि मानश्चभेदाग्रहात्॥ ममेदंकर्तव्यमितिमेदग्राहःपुरुषोपरागोबुद्धेःस्वच्छत यातत्प्रतिबिंबादतात्त्विकः॥ दर्पणस्येवमुखोपरागः॥ इदमितिविषयोपरागइं द्रियप्रणालिकयापरिणतिभेदस्तात्त्विकः॥ निश्वासाभिहतदर्पणस्येवम लिनिमा॥ कर्तव्यमितिव्यापाराद्यः॥ तेनाद्यत्रयवती बुद्धिस्तत्परिणामे नज्ञानेनपुरुषस्यातात्त्विकःसंबंधः॥ दर्पणमलिम्लेवमुखस्यमालिन्यापा लब्धिरुच्यते॥ ज्ञानवत्सुखदुःखेच्छाद्वेषयत्नधर्माधर्माःपिबुद्धेरेवक

तिसामानाधिकरण्येन प्रतीतेः। नच बुद्धिश्चेतना। परिणामित्वात्। इति मतमा
पास्तं। कृत्स्नदृष्टीनामनभिव्यक्तचैतन्यस्यापि सामानाधिकरण्येन प्रतीतेस्तद्भिन्नेभा न
नाभावात्। चेतनोऽहमेवेति प्रतीतेः। चैतन्यं ज्ञानमेवेति चेत्। कस्यैवं
किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वेनामोक्षापातः। अनित्यत्वे तत्पूर्वमसंसारापत्तिः।
अचेतनायाः प्रकृतेः कार्यत्वात्। बुद्धेरचैतन्यं कार्यकारणयोरेक्यादिति चे
न। प्रकृतसिद्धेः। बुद्धेः कर्तृजन्यत्वमानाभावात्। वीतरागजन्मादर्शना
त्तस्या अनादित्वमनादर्शावस्यानाशसंभवात्। नित्यत्वे तत्कं प्रकृत्यादिकल्पने
न। नच प्रकृतेः क्रियमाणगुणा कर्माणि सर्वज्ञः अहंकारविमूढात्मा

कर्तृहमितिमन्येतेत्यनेनविरोधइतिवाच्यं। प्रकृतेरदृष्टस्य गुणैरिच्छादिभिः
कर्तृहमित्यस्यतदर्थत्वात्। तत्रैवंसतिकर्तारमात्मानंकेवलंतुयः। पश्यत्य
कृतबुद्धित्वान्नसपश्यतिदुर्मतिः। इत्यादिवदताभगवताप्रकटीकृतोयमु
परिष्टाद्दर्शयइतिसंक्षेपः। धर्माधर्माश्रयइति। आत्मसमवेतयो
रित्यस्यतदाश्रयसंदेहांतरकृतकर्मणांदेहांतरभोगानुपपत्तेः। विशे
षगुणयोगतः इति। योग्यविशेषगुणसंबंधेनआत्मनः प्रत्यक्षत्वंभव
तिनान्यथा। अहंज्ञानेऽहंकारेमित्यादिप्रतीतेः। प्रवृत्तीति। आत्मा
परदेहेप्रवृत्त्यादिनाऽनुमीयतेति। प्रवृत्तिरत्रचेष्टा। ज्ञानेच्छा

प्रयत्नादीनांदेहेऽभावस्याऽऽप्तत्वाच्चेष्टायाः प्रयत्नसाध्यत्वात्॥ चेष्टया
प्रयत्नवानेषआत्माऽनुमीयतइतिभावः॥ अत्रदृष्टांतमाह॥ रथेति॥ यथा
रथकर्मचेष्टानभवतितथापितेनकर्मणासारथिर्यथानुमीयते॥ तथाचेष्टा
त्मकेनकर्मणापरमात्मापीतिभावः॥ अहंकारस्येति॥ अहंकाराऽहमितिप्र
त्ययः॥ तस्याश्रयोविषयआत्मानःशरीरादिरिति॥ मनइति॥ मनोभिन्नेंद्रि
यजन्यप्रत्यक्षाविषयःमानसप्रत्यक्षविषयश्चेत्यर्थः॥ रूपाद्यभावेनेंद्रिया
तरायोग्यत्वात्॥ विभुरिति॥ विभुत्वंपरममहत्तच्चपूर्वमुक्तमपिस्पष्टार्थं
मुक्तं॥ बुद्ध्यादिरिति॥ बुद्धिसुखदुःखेच्छादयश्चतुर्दशगुणापूर्वमुक्तावे

दितव्याः॥ अत्रैवप्रसंगात्कतिपयंबुद्धिप्रपंचंदर्शयति॥ द्वैविध्यंव्यूत्पादय
ति॥ अनुभूतिरिति॥ प्रत्यक्षमिति॥ इंद्रियजन्यंज्ञानंप्रत्यक्षंयद्यपिमनोरूपेंद्रि
यजन्यंसर्वमेवज्ञानंतथापींद्रियत्वेनरूपेणेंद्रियाणांयत्रज्ञानेकरणत्वंतत्प्र
त्यक्षमितिविवक्षितं॥ ईश्वरप्रत्यक्षंतुनलक्ष्यं॥ इंद्रियार्थसन्निकर्षोत्पन्नमितिसूत्रेतथै
वोक्तत्वात्॥ अथवाज्ञानाकरणकंज्ञानंप्रत्यक्षं॥ अनुमितौव्याप्तिज्ञानस्यउपमि
तौसादृश्यज्ञानस्यशब्दबोधेपदज्ञानस्यस्मरणेअनुभवस्यकरणत्वान्नतत्रा
तिव्याप्तिः॥ इदंलक्षणमीश्वरप्रत्यक्षसाधारणं॥ परामर्शजन्यज्ञानमनुमितिः
यद्यपिपरामर्शप्रत्यक्षादिकंपरामर्शजन्यंतथापिपरामर्शजन्येहत्वविष

यकंज्ञानमनुमितिः॥ नचकादाचित्कहेतुविषयकानुमितावव्याप्तिरितिवाच्यं॥
तादृशज्ञानत्वस्यानुभवत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥ अथवाव्याप्तिज्ञा
नकरणकंज्ञानमनुमितिः॥ एवंसादृश्यज्ञानकरणकंज्ञानमनुमितिः॥ पदज्ञान
करणकंज्ञानंशाब्दबोधः॥ वस्तुतोयंकिंचिदनुमितिव्यक्तिमादायतद्व्यक्ति
वृत्तित्वंसंतियंकिंचित्प्रत्यक्षवृत्तिजातिमत्वंअनुमितित्वं॥ एवंयंकिंचित्प्रत्य
क्षादिकमादायतद्व्यक्तिवृत्त्यनुमित्यनुवृत्तिजातिमत्वंप्रत्यक्षत्वादिकंवाच्यं॥ प्र
त्यक्षाणिविभजते॥ घ्राणजाद्दृष्टिति॥ घ्राणजंरसनचाक्षुषस्पार्शनंश्रोत्रं
मानसमितिषड्विधंप्रत्यक्षं॥ नचेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं॥ ज
न्यप्रत्यक्षस्यैवनिरूपणीयत्वात्॥ उक्तसूत्रानुसारात्॥ गोचरइति॥ ग्रा

ह्यइत्यर्थः॥ गंधत्वादिपदात्सुरभित्वादिपरिग्रहः॥ गंधस्यप्रत्यक्षत्वान्नद्रव्यजातिइत्यर्थः॥
तथाशब्दत्वादिसहितइत्यर्थः॥ गंधोरसश्चउद्भूतोबोध्यः॥ उद्भूतरूपमिति॥ ग्रीष्मो
ष्मादावनुद्भूतमितिनप्रत्यक्षं॥ तद्वदितिउद्भूतरूपवंतिः॥ योग्यइति॥ पृथक्त्वादिक
मपियोग्यव्यक्तिवृत्तिबोध्यं॥ तादृशोयोग्यव्यक्तिवृत्तिः॥ चक्षुर्योग्यत्वमेवकथंतद
इः॥ गृह्णातीतिः॥ आलोकसंयोगउद्भूतरूपंचचाक्षुषप्रत्यक्षेकारणं॥ तत्रद्र
व्यस्यतेनचाक्षुषंप्रतितयोःसमवायसंबंधेनकारणत्वं॥ द्रव्यसमवेतप्र
त्यक्षेस्वाश्रयसमवायसंबंधेनद्रव्यसमवेतसमवेतरूपा[illegible]तादेःप्रत्यक्षे
स्वाश्रयसमवेतसमवायसंबंधेनेतिः॥ उद्भूतस्पर्शवद्द्रव्यत्वंचोगोचरः॥

DR BHAU DA

सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं च यच्चक्षुषो योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यं। तथा च पृथक्कसंस्वादयोये चक्षुर्ग्राह्या गुणा उक्ताः। एवं क्रियाश्च वक्ष्यमाणा योग्याश्च तत्तत्स्वेन ग्राह्या इत्यर्थः। अत्रापि त्वगिन्द्रियजन्ये द्रव्यप्रत्यक्षे रूपं कारणं। तथा च बहिरिन्द्रियजन्ये द्रव्य प्रत्यक्षे रूपं कारणमिति। नवीनास्तु। बहिर्द्रव्यप्रत्यक्षमात्रे रूपं न कारणं। प्रमाणाभावात्। किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणं। अन्वयव्यतिरेकात्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न किंचित्। आत्मा वृत्तिर्ज्ञानभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु

३४

रूपस्य कारणे त्वलाघवमिति चेन्न। वायोस्त्वगिन्द्रियेणाग्रहणप्रसंगात्। इष्टापत्तिरिति चेन्न। उद्भूतस्पर्शएवलाघवात्कारणमस्तु। प्रभायाः अप्रत्यक्षत्वेन्द्रिष्टापत्तिरेव किं न स्यात्। तस्मात्समानप्रत्यक्षीमिति वद्वायुस्पृक्षीमिति प्रत्ययस्य सत्त्वाद्वायोरपि प्रत्यक्षत्वं वक्तव्यं। बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं। वायुप्रभयोरेकत्वप्रसंगात्। एवं क्वचिद्द्वित्वादिकमपि। क्वचित्संख्यापरिमाणाद्यगृह्यदोषादित्याहुः। द्रव्याध्यक्षेति। स्वजन्यः संयोगो ज्ञानसामान्यकारणमित्यर्थः। किं तत्र प्रमाणं। सुषुप्तिकाले त्वचं संयुक्तो पुरितति वर्त्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किंचा

नांशविषयति। अनुभवरूपंस्मरणरूपंवा। नाद्यः। अनुभवसामग्र्याभावात्। तथाहि। प्रत्यक्षेचक्षुरादीनांसहमनःसंयोगस्यहेतुत्वात्तदभावादेवनचा क्षुषादिप्रत्यक्षं। ज्ञानोदयाभावादेवमानसप्रत्यक्षं। ज्ञानाद्यभावेचात्मनो पिनप्रत्यक्षमिति। व्याप्तिज्ञानाभावादेवनानुमितिः। सादृश्यज्ञानाभावा न्नोपमितिः। पदज्ञानाद्वान्नज्ञाद्बोधः। इत्यनुभवसामग्र्याभावान्नानु भवः। नास्मरणमेवं। सुषुप्तिप्राक्कालोत्पन्ने छादिव्यक्तेस्तत्संबंधेनात्मनश्चप्रत्यक्षत्वप्रसंगात्। तदतींद्रियत्वेना भावात्। सुषुप्तिप्राक्कालेनिर्विकल्पकमेवनियमेनजायतइत्यत्रा

पिप्रमाणाभावात्। अथज्ञानमात्रेत्वन्मनःसंयोगस्ययदिकारणत्वं तदाऽसनचा क्षुषादिकालेत्वन्मनःसंयोगस्यसत्वात्। विषयैकसंयोगस्यत्वन्मनःसंयोगस्यचसत्वात्। परस्परप्रतिबंधादेकमपिनस्यात्। अत्रकेचित्सूक्तकृत्यत्वन्मनोयोगस्यहे तुत्वसिद्धेचाक्षुषादिसामग्र्याःस्मृतिबंधकत्वमनुभवानुरोधात्कल्प्य तेति। अन्येतुसुषुप्त्यनुरोधात्तन्मनःसंयोगस्यज्ञानहेतुत्वंकल्प्यते। चाक्षु षादिप्रत्यक्षकालेत्वन्मनःसंयोगाभावान्नत्वाचप्रत्यक्षमिति। मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषयइत्यर्थः। मतिर्ज्ञानंस्मृतिः प्रयत्नः। एवंसुखदुःख त्वादिकमपिमनोग्राह्यं। एवमात्मापिमनोग्राह्यः। किंतुमनोमात्रस्यैगच्चि

रइत्यनेन पूर्वमुक्तत्वादत्रनोक्तं। निर्विकल्पकारव्यमितिं। चक्षुःसंयोगानंतरं
घटइत्याकारकंघटत्वादिविशिष्टज्ञानंनसंभवतिं। पूर्वंविशेषणस्यघटत्वा
देर्ज्ञानाभावात्तुं। विशिष्टबुद्धेर्विशेषणज्ञानस्यहेतुत्वात्तुं। तथाचप्रथमेता
वद्घटघटत्वयोर्विशिष्यानवगाहिज्ञानंजायतेतदेवनिर्विकल्पकंतच्चनि
र्विकल्पकत्वंनप्रत्यक्षंं। तथाहुं। वैशिष्ट्यानवगाहिज्ञानस्यप्रत्यक्षंन
भवतिं। घटमहंजानामीतिप्रतीयात्तुं। तत्रआत्मनिज्ञानंप्रकारीभूय
भासतें। ज्ञानेघटः तत्रघटत्वंप्रकारोयःसएवविशेषणमित्युच्यतें।
विशेषणेयद्विशेषणंतद्विशेषणतावच्छेदकमित्युच्यतेविशेषणता

वच्छेदकप्रकारकंज्ञानंविशिष्टवैशिष्ट्यज्ञानेकारणंं। निर्विकल्पकेचघटत्वा
दिकेनप्रकारस्तेनघटत्वादिविशिष्टघटादिवैशिष्ट्यज्ञानंनसंभवतिं। घट
त्वंयप्रकारकंचघटादिविशिष्टज्ञानंनसंभवतिं। जातिरिक्तपदार्थज्ञान
स्ययत्किंचिद्धर्मप्रकारत्वनियमातुं। महत्त्वंयद्धेतुरितिं। द्रव्यप्रत्यक्षे
महत्त्वंसमवायसंबंधेनकारणंं। द्रव्यसमवेतानांगुणकर्मसामान्यानांप्र
त्यक्षेस्वाश्रयसमवायसंबंधेनं। द्रव्यसमवेतसमवेतानांगुणकर्मत्वरूपा
दीनांप्रत्यक्षेस्वाश्रयसमवेतसमवायसंबंधेनकारणमितिं। इंद्रियमिति
अत्रापिषष्ठ्यर्थइत्यनुषज्यतें। इंद्रियत्वंतुनजातिः। पृथिवीत्वादिना

संकर्षीत्, किंतु ऊर्द्धतरोद्भूतविशेषगुणानाश्रयत्वेसतिज्ञानकारणमनःसंयोगा
श्रयत्वं आत्माद्दिकारणायसंयंतं उद्भूतविशेषगुणस्याश्रित्वेसत्यूर्द्धतरेति
विशेषगुणरूपोद्भूतस्पर्शवित्वादुद्भूतेति उद्भूतत्वेनजातिः शुक्लत्वादिनासं
कर्षीत्, नचशुक्लत्वादिव्याप्येनानेकोद्भूतत्वमितिवाच्यं उद्भूतरूपत्वादिना
५ चाक्षुषादौजनकतानुपपत्तेः किंतुशुक्लत्वादिव्याप्यमनुद्भूतत्वेनानातदभा
वकूटस्योद्भूतत्वं तच्चसंयोगादावपि तथाचोर्द्धतरोद्भूतगुणःसंयोगादि
रप्यक्षुषादौअस्त्येवेतिविशेषेति कालादिकारणायविशेषदलं इंद्रियावयव
विषयसंयोगस्यापिप्राचांमतेप्रत्यक्षजनकत्वादिंद्रियावयवकारणायकाला

दौरूपाभावप्रत्यक्षेसन्निकर्षघटकतयाकारणीभूतचक्षुःसंयोगाश्रयस्यकालादेश्चकार
णायमनःपदं ज्ञानकारणमपितद्धारणायं करणमितिं असाधारणकारणं करणं
असाधारणंव्यापारवत्त्वं विषयेंद्रियसंबंधोव्यापारः सापिषड्विधइतिं व्यापारः सं
न्निकर्षः षड्विधसन्निकर्षउदाहरणद्वारादर्शयतिं द्रव्यग्रहेसंयोगासंयुक्तसं
मवायतः द्रव्येषुसमवेतानांतथातत्समवायतः तत्रापिसमवेतानांशब्दस्यसम
वायतः तद्वृत्तीनांसमवेतसमवायेनतुग्रहः विशेषणतयातद्भावानांत्वग्रहो
भवेत्तुं प्रत्यक्षंसमवायस्यविशेषणतयाभवेदितिं द्रव्यप्रत्यक्षंइंद्रियसंयोगज
न्यं द्रव्यसमवेतप्रत्यक्षंइंद्रियसंयुक्तसमवायजन्यं एवमग्रेपिं वस्तुतस्तुद्र

व्यचाक्षुषंप्रतिचक्षुःसंयोगाकारणं॥ द्रव्यसमवेत-चाक्षुषंप्रति-चक्षुःसंयुक्तसम
यतः॥ द्रव्यसमवेतसमवेत-चाक्षुषंप्रति-चक्षुःसंयुक्तसमवेतसमवायतः॥ ए
वमन्यत्रापिविशिष्यैवकार्यकारणभावः॥ परंतु पृथिवीपरमाणौ नीलेनिलत्वं
पृथिवीपरमाणौपृथिवीत्वंचक्षुषाकथंनगृह्यते॥ परंपरयाऽद्भूतरूपसंबं
धस्यमहत्त्वसंबंधस्यचविद्यमानत्वात्॥ तथाहि॥ नीलत्वंजातिरेकैवघट
नीलेपरमाणुनीलेचवर्त्तते॥ तथाचमहत्त्वसंबंधोघटनीलमादायवर्त्तते॥
रूपसंबंधस्तुउभयमादायैववर्त्तते॥ एवंपृथिवीत्वंघटादिकमादायमह
त्त्वसंबंधोबोध्यः॥ एवंवायौतदीयस्पर्शेद्रव्यसत्तायाश्चाक्षुषप्रत्यक्षस्या

त्॥ तस्माद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्न-चक्षुःसंयुक्तसमवायस्यद्रव्यसमवे
त-चाक्षुषेतादृश-चक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेत-चाक्षुषका
रणत्वंवाच्यं॥ इत्थंपरमाणुनीलोद्भूतनीलत्वादिग्रहः॥ परमाणौचक्षुःसंयोगस्य
महत्त्वावच्छिन्नत्वाभावात्॥ एवंवायवादौनसत्तादि-चाक्षुषं॥ तत्रचक्षुःसंयोगस्य
रूपानवच्छिन्नत्वात्॥ एवंयत्रघटस्यपृष्ठावच्छेदेनालोकसंयोगः-चक्षुःसंयो
गस्तूत्तरावच्छेदेनतत्रघटप्रत्यक्षाभावात्॥ अलोकसंयोगावच्छिन्नत्वं-चक्षुः
संयोगविशेषणंदेयं॥ एवंद्रव्यस्पार्शनप्रत्यक्षेत्वक्संयोगः-कारणं॥ द्रव्यसम
वेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवायः॥ द्रव्यसमवेतसमवेतस्पार्शनप्र

BHAU DAJI

सक्षेत्वक्संयुक्तसमवेतसमवायः। अत्रामूर्त्तावच्छिन्नसंउद्भूतस्पर्शावच्छिन्न
संचपूर्ववद्बोध्यं। एवंगंधप्रत्यक्षेघ्राणसंयुक्तसमवायः। गंधसमवेतस्य
घ्राणजप्रत्यक्षेघ्राणसंयुक्तसमवे तसमवायः। रसप्रत्यक्षेरसनासंयुक्तसम
वायः। रससमवेतस्यरसनप्रत्यक्षेरसनसंयुक्तसमवेतसमवायकारणं।
शब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः। शब्दसमवेतश्रावणप्रत्यक्षेश्रोत्रावच्छि
न्नसमवेतसमवायःकारणं। अत्रसर्वत्रप्रत्यक्षंलौकिकंबोध्यं। वक्ष्यमाणम
लौकिकप्रत्यक्षंइंद्रियसंयोगादिकंविनापिभवति। एवमात्मनःप्रत्यक्षेमनः
संयोगः। आत्म समवेतमानसप्रत्यक्षेमनःसंयुक्तसमवायः। आत्म

समवेतस मवेतमानसप्रत्यक्षेमनःसंयुक्तसमवेतसमवायःकारणं। अभावप्र
त्यक्षेसमवायप्रत्यक्षेचइंद्रियसंबंधविशेषणताहेतुः। वैशेषिकमतेतुन स
मवायप्रत्यक्षः। अत्रयद्यपिविशेषणतानानाविधा। तथाहि। भूतलादौ
घटाभावःसंयुक्तविशेषणतया। संख्यादौचरूपाद्यभावःसंयुक्तस
मवेतविशेषणतया। संख्यात्वादेरूपत्वाद्यभावःसंयुक्तसमवेतसमवेतवि
शेषणतया। शब्दाभावःकेवलश्रोत्रावच्छिन्नविशेषणतया। कादेरव
त्वाद्यभावःश्रोत्रावच्छिन्नसमवेतविशेषणतया। एवंकत्वावच्छिन्नाभा
वे खत्वाभावादिकंविशेषणविशेषणतयाएवमन्यदपूह्यं। तथा

विशेषणतात्पर्येनैकवस्तुग्राह्यत्वं। अन्यथा षोढासन्निकर्षइति प्राचांमतप्र
वादोव्याहन्यतेतिं। यादृशःस्यादुपलभ्येतसेवंयत्रप्रसज्यतइतिं। आलो
कप्रसक्तेर्योग्यानुपलब्धिःकारणं। तथाहिं। भूतलादौघटादिज्ञानेजाते
घटाभावादिकंनज्ञायतेंतेनाभावोपलंभप्रतियोग्यपलंभाभावःकार
णं। अत्रयोग्यताप्यपेक्षितां। साचप्रतियोगिसत्वप्रसंजनप्रसंजितप्र
तियोगिकत्वरूपां। तदर्थञ्चं। प्रतियोगिनोघटादेःसत्वप्रसक्त्याप्रसंजि
तउपलंभरूपःप्रतियोगियस्यसउपलंभाभावप्रसक्तेहेतुः। तथाहिं। य
त्रालोकसंयोगादिकंवर्त्ततेतत्रयत्रघटःस्यात्तर्हिउपलभ्येतेत्यापाद

यितुंशक्यतें। तत्रघटाभावाप्रसक्तिंभवतिं। अंधकारेतुआपादयितुंनश
क्यतें। तेनघटाभावादंधकारेचाक्षुषप्रसक्तिनं। स्यादिनप्रसक्तिंतुभवत्ये
वं। आलोकसंबंधंविनापिस्यादीनप्रसक्तस्यापादयितुंशक्यत्वात्तुं। गुरु
त्वादिकंयदयोग्यंतदभावस्तुनप्रसक्तः। तत्रगुरुत्वप्रसक्तस्यापादयितुम
शक्यत्वात्तुं। वायावुद्भूतरूपाभावःपाषाणेसौरभाभावःगुडेतिक्ताभावःव
ह्नौअनुष्णत्वाभावःश्रोत्रेशब्दाभावःआत्मनिसुरत्वाभावःएवमादायस्तुत
स्तर्हिद्रव्येर्म्रक्षंतेंतत्तत्प्रसक्तस्यापादयितुंशक्यत्वात्तुं। संसर्गाभावप्र
सक्तेप्रतियोगिनोयोग्यत्वं। अन्योन्याभावप्रसक्तेऽधिकरणयोग्यत्वं

अपेक्षितं। अतः स्तंभादौ पिशाचादिभेदोपि चक्षुषागृह्यत एव। प्रत्यक्षं लौकिकं
कालौकिकभेदेनद्विविधं। तत्रलौकिकप्रत्यक्षेषोऽसन्निकर्षउक्तः। अलौकिक
कसंन्निकर्षस्त्विदानीमुच्यते। व्यापारःसंन्निकर्षः सामान्यलक्षणंयस्यसोर्थः।
तत्रलक्षणपदेनयदिस्वरूपमुच्यतेतदासामान्यस्वरूपाप्रत्यासत्तिरर्थोलभ्य
ते। तच्चेंद्रियसंबद्धविशेष्यकज्ञानेप्रकारीभूतंबोध्यं। तथाहि। इंद्रियसंयु
क्तोधूमादिःतद्विशेष्यकंधूमइतिज्ञानंयत्रजातंतत्रज्ञानेधूमत्वंप्रकारः
तत्रधूमत्वेनसन्निकर्षेणधूमाःइत्येवंरूपंसकलधूमविशेष्यकंज्ञानंजा
यते। अत्रयदींद्रियसंबद्धमेवोच्यतेतदाधूलीपटलेधूमभ्रमानंतरं

सकधूमविशेष्यकंज्ञानंनस्यात्। तत्रधूमत्वेनसहइंद्रियसंबंधाभावात्। मन्मतेतु इं
द्रियसंबंधधूलीपटलंतद्विशेष्यकंधूमइतिज्ञानंतत्रप्रकारीभूतंधूमत्वंप्रत्यासत्तेः।
इंद्रियसंबद्धश्चलौकिकोग्राह्यः। इदंबहिरिंद्रियस्थलेमानसप्रत्यक्षस्थलेतुज्ञानप्र
म प्रकारीभूतंसौन्यसंन्निकर्षः। परंतुसमानानांभावःसामान्यंतच्चकिंचिन्निसंधूमत्वा
दिकंकिंचिदनिसघटादेःयत्रएकोघटसंयोगसंबंधेनभूतलेसमवायेनकपालेवा
ज्ञातःतदनंतरंचसर्वेषांतद्घटवताभूतलादीनांकपालानांवाज्ञानंभवतितत्रेदं
बोध्यं। परंतुसामान्येयेनसंबंधेनज्ञायतेतेनसंबंधेनाधिकरणानांप्रत्यासत्तिः।
तथाचयत्रतद्घटज्ञानंतरंतद्घटवतःस्मरणंजातंतत्रसर्वेषांतद्घटवतां

भानंनस्यात्‌। सामान्यस्यतदानीमभावात्‌। किंचइंद्रियसंबद्धविशेष्यकंघटइतिज्ञानं
यत्रजातंतत्रपरदेनेंद्रियसंबंधंविनापितादृग्ज्ञानप्रकारीभूतसामान्यस्यसत्त्वात्तक
ल घटविषयकज्ञानंकुतोनजायेत तस्मात्सामान्यज्ञानंप्रत्यासत्तिर्नतुसामान्यमितिचा
आसत्तिरितिचप्रत्यासत्तिरित्यर्थः। सामान्यज्ञानमितिच। तथाचसामान्यलक्षणइत्य
त्रलक्षणशब्दस्यविषयोर्थः। तेनसामान्यविषयकंज्ञानंप्रत्यासत्तिरितीरुलभ्यते।
ननुचक्षुःसंयोगादिकंविनापिसामान्यज्ञानंयत्रवर्त्ततेा तदाघटादीनांप्रत्यक्षंस्या
दतआहा तद्धियजेतिा अस्यार्थः। यदाबहिरिंद्रियेणसामान्यलक्षणयाज्ञा
नंजननीयंतदायत्किंचिद्धर्मिणितत्सामान्यस्यतद्धियजन्यज्ञानसामग्र्यपेक्षि
ताा सात्रसामग्रीचक्षुःसंयोगालोकसंयोगादिकंा तेनांधकारादौचक्षुरादि

नातादृग्ज्ञानंसामग्र्यपेक्षिा नजन्यतेा ननुज्ञानलक्षणाप्रत्यासत्तिर्यद्धिज्ञानंरूपासामान्य
लक्षणाप्यज्ञानरूपातदातयोर्भेदोनस्यादतआहा विषयीतिा सामान्यज्ञानरूपाप्रत्यासत्ति
र्हितदाश्रयस्यज्ञानंजनयतिा ज्ञानलक्षणाप्रत्यासत्तिस्तुयद्धिषयकंज्ञानंतस्यैवप्रत्या
सत्तिरितिा अस्यायमर्थः। प्रत्यक्षेसन्निकर्षंविनाज्ञानंनसंभवतिा धूमत्वेनसक
लधूमानांवह्निनासकलवह्नीनांभानंकथंभवतुतदर्थंसामान्यलक्षणास्वीक्रिय
तेा नचसकलवह्निधूमभानाभावेकक्षतिरितिवाच्यंा प्रत्यक्षधूमवह्निसंबंध
स्यग्रहात्तदन्यधूमस्यचानुपस्थितेस्तद्धूमोवह्निव्याप्योनवेतिसंशयानुपपत्तेः।
मन्मतेतुसामान्यलक्षणयासकलधूमोपस्थितौकालांतरीयेदृग्ज्ञानतरीयः

धूमेवह्निव्याप्यत्वसंदेहासंभवति। नचसामान्यलक्षणास्वीकारेप्रमेयत्वेनसकलप्रमेयज्ञानेजातेसार्वज्ञापत्तिरितिवाच्यं। प्रमेयत्वेनसकलप्रमेयज्ञानेपिविशिष्यसकलपदार्थानामज्ञातत्वेनसार्वज्ञाभावात्। एवंज्ञानलक्षणायाअस्वीकारेकरभीयचंद्रमितिचाक्षुषज्ञानेसोरभस्यभानंकथंस्यात्। यद्यपिसामान्यलक्षणयासोरभस्यभानंसंभवति तथापिसोरभत्वस्यभानंज्ञानलक्षणयाएवंधूमत्वेनधूलीपटलेयत्रजातंतत्रधूलीपटस्यानुव्यवसायेभानंज्ञानलक्षणया॥ योगीत्यितियोगीद्विविधः॥ युक्तोयंजानश्च॥ अतोयोगजधर्मस्यापिद्वैविध्यं। युक्तस्यतावद्योगजधर्मसहकृतेनमनसाआकाशपरमाण्वादिनिखिलपदार्थगोचरज्ञानस

र्वदेवाविदुर्मुक्तिः। द्वितीयस्यचिंताविशेषोपिसहकारी॥ अनुमितिंचसादर्शयति। व्यापारस्त्विति। अनुमायामनुमितौव्याप्तिज्ञानकरणं॥ परामर्शोव्यापारः॥ तथाहि। येनपुरुषेणधूमोवह्निव्याप्यइतिगृहीतापश्चाच्चसएवपुरुषःकचित्सर्वतादावनवच्छिन्नमूलधूरेखांपश्यति। तदनंतरंधूमोवह्निव्याप्यइत्येवंरूपंव्याप्तिस्मरणंतस्यभवति। पश्चाच्चवह्निव्याप्यधूमवानयंपर्वतइतिज्ञानंभवति॥ सएवपरामर्शइत्युच्यते। तदनंतरंपर्वतोवह्निमानितिज्ञानंजायते। तदेवानुमितिः॥
यमा तत्रप्राचीनाःवदंति॥ व्याप्यत्वेनज्ञातोधूमादिर्लिंगमनुमितिकरणं तदूषयति। ज्ञायमानमितिं। लिंगस्यानुमितिकरणत्वेकृतिमाह। आनागतादिति।

यथनुमितौ लिंगकरणस्यात्तत्रा तदाऽनागतेनवा विनष्टेनवा लिंगेनानुमितिर्नस्यात्तु अनुमितिकरणस्य तदानीमभावादिति व्याप्तस्येति व्याप्तिविशिष्टस्य पक्षेणसहवैशिष्ट्यावगाहिज्ञानमनुमितौजनकं तच्च व्याप्यःपक्षइतिपक्षोव्याप्यवानितिज्ञानेच अनुमितिस्तूपपक्षेव्याप्यइतिज्ञानासक्षेसाध्यमिसाकारिका पक्षोव्याप्यवानितिज्ञानासक्षेःसाध्यवानितिद्विविधादपिपरामर्शात्सक्षःसाध्यवानितेवानुमितिरित्यन्ये ननुवह्निव्याप्यधूमवान्पर्वतइतिज्ञानंविनापियत्रधूमवानितिप्रसक्षंततोवह्निव्याप्यइतिस्मरणं तत्रज्ञानद्वयादनुमितिदर्शनात्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानंसर्वत्रनकारणं किंतुव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनका

रणत्वं आवश्यकत्वाद्विशिष्टज्ञानकल्पनागौरवाच्चेतिन्न व्याप्यतावच्छेदज्ञानेपिवह्निव्याप्यवानितिज्ञानादनुमितिसत्तेः लाघवाच्चव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वं किंचधूमवान्पर्वतइतिज्ञानादनुमितापत्तिर्व्याप्यतावच्छेदकीभूतधूमत्वप्रकारस्यपक्षधर्मताज्ञानस्यसत्वात्तु नचगृह्यमाणव्याप्यवज्ञा छेदकप्रकारकपक्षधर्मतानस्यहेतुत्वंवाच्यं चैत्रस्यव्याप्तिग्रहेमैत्रस्यपक्षधर्मताज्ञानादनुमितापत्तेः यदितुयत्पुरुषीयगृह्यमाणव्याप्यवच्छेदकप्रकारकंतत्पुरुषीयपक्षधर्मताज्ञानंतत्पुरुषीयानुमितौहेतुरिष्यतेतदाऽनंतकार्यकारणभावः मन्मतेतुसमवायेनव्याप्तिप्रकारकपक्षधर्मताज्ञानंस

मवायेनानुमितिंजनतीत्यत्रोक्तानंतकार्यकारणभावः॥ यदिव्याप्तिप्रकारकज्ञानंप
क्षधर्मताज्ञानमित्यत्रतत्रकारणमित्युच्यते॥ तदाकार्यकारणभावद्वयं॥ वह्निव्या
प्योधूमआलोकवान्पर्वतइतिज्ञानादप्यनुमितिस्यादिति॥ इहचयत्रज्ञानंतत्रा
पिविशिष्टज्ञानंकल्पनीयं॥ फलमुखगौरवस्यदोषत्वादिति॥ व्याप्योनामव्याप्या
श्रयःतत्रव्याप्तिःकेसतआह॥ व्याप्तिरित्यादि॥ साध्येति॥ वह्निमान्धूमादित्यादौसा
ध्यंवह्निः साध्यवान्महानसादिः तदन्योजलह्रदादिः तदवृत्तिर्धूमस्येतिलक्ष
णसमन्वयः॥ धूमवान्वह्नेरित्यादौसाध्यवदन्यस्मिन्यःपिंडादौवह्निःसत्त्वा
त्तिव्याप्तिः॥ अत्रयेनसंबंधेनसाध्यतेनैवसाध्यवान्बोध्यः॥ अन्यथासमवा

यसंबंधेनवह्निमान्वह्नेरवयवस्तदन्योमहानसादिस्तत्रधूमस्यविद्यमानत्वा
दव्याप्तिप्रसंगात्॥ साध्यवदन्यश्चसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान्
बोध्यः॥ तेनयत्किंचिद्वह्निमतोमहानसादेर्भिन्नेपर्वतादौधूमस्यसत्वेपिनक्षि
तिः॥ येनसंबंधेनहेतुस्तेनसंबंधेनसाध्यवदन्यावृत्तित्वंबोध्यं॥ तेनसाध्य
वदन्यस्मिन्धूमस्यसमवायसंबंधेनसत्वेपिनक्षितिः॥ साध्यवदन्यावृत्तित्व
चसाध्यवदन्यवृत्तित्वंतावच्छिन्नाभावस्तेनधूमवान्वह्नेरित्यत्रसाध्यव
दन्यजलह्रदादिवृत्तित्वाभावसत्वेपिनक्षितिः॥ अत्रयद्यपिद्रव्यगुणक
र्माण्यसविशिष्टसत्तादिमत्त्वेविशिष्टसत्तायाःसत्तायाश्चैक्यात्साध्यवद

न्यस्मिन्समवायेनगुणादावृत्तित्वंनास्ति। तथापिहेतुतावच्छेदकरूपेणावृत्तित्वंबोध्यं। हेतुतावच्छेदकंवृत्तितानवच्छेदकमितिफलितोर्थः। ननुकेवलान्वयिनिज्ञेयत्वादौसाध्येसाध्यवदन्यस्याप्रसिद्ध्यादव्याप्तिः। किंचसत्तावान्जातेरित्यादौसाध्यवदन्यस्मिन्सामान्यादौहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तेरप्रसिद्ध्यादव्याप्तिरतआह। अथवाहेतुमन्निष्ठविरहप्रतियोगिना। साध्येनहेतोरधिकरणंव्याप्तिरुच्यते। हेतुमतिनिष्ठावृत्तिर्यस्यतथाविरहोऽभावः। तथाहेत्वधिकरणवृत्तियोभावःसतदप्रतियोगिनासाध्येनसहेतोःसामानाधिकरण्यंव्या

प्तिः। अत्रयेपिवह्निमान्धूमादित्यादौहेत्वधिकरणंपर्वतादिवृत्त्यभावप्रतियोगित्वंतन्नद्ध्रस्योदस्तीत्यव्याप्तिः। नचसामानाधिकरण्यंवह्निधूमयोरेवव्याप्तिरितिवाच्यं। तद्धेरप्युभयाभावसत्वोदकसंबंधेनास्तीतिप्रतीतेः। गुणवान्द्रव्यत्वादित्यादावव्याप्तेश्च। तथापिसाध्यतावच्छेदकंप्रतियोगितानवच्छेदकमितिवाच्यं। ननुरूपत्वव्याप्यजातिमत्त्वान्पृथिवीत्वादित्यत्रसाध्यतावच्छेदकाःरूपत्वव्याप्यजातयस्तासांचेशुक्लत्वादिरूपाणांनीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरितिचेन्न। परंपरयारूपत्वव्याप्यजातिमत्त्वस्यैवसाध्यतावच्छेदकत्वात्। नहितादृग्धर्मावच्छिन्नाभावःक्वापिपृथिव्यामस्ति। रूपत्वव्याप्य

जातिमन्नास्तीति बुध्यापत्तेः। एवं दंडिमान् दंडिसंयोगादिस्थलेऽपि परंपर
यादंडत्वमेव साध्यतावच्छेदकमिति नाव्याप्तिः। साध्यादिभेदेन व्यासर्ज्जदा
नादृश्यस्थले साध्यतावच्छेदकतावच्छेदकप्रतियोगितावच्छेदकतानव च्छे
दकमिसेवलक्षणघटकमिसपिवदंति। हेत्वधिकरणहेतुतावच्छेदक
विशिष्टाधिकरणं वाच्यं। तेन द्रव्यगुणकर्मण्यत्वविशिष्टसत्तादिसादो
शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्या
ता प्तिः। हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं। तेन समवायेन धूमा
ध्यधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः। आभा

वश्चप्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयोगिएतद्वृक्षत्वादिस्थ्र
मूलावच्छेदेनैव तद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेपि कपिसंयोग
स्य नाव्याप्तिः। न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरण
वृत्तित्वं तदा तथैव व्याप्तिः। प्रतियोगिनः कपिसंयोगस्यानधिकरणगु
णादौ वर्त्तते योऽभावः तस्यैव वृक्षेमूलावच्छेदेन सत्ता तु। यदि प्रतियो
ग्यधिकरणावृत्तित्वं तदा संयोगीसत्वादिसादावतिव्याप्तिः। सत्ताधिकर
णगुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति
वाच्यं। हेत्वधिकरणप्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्यविवक्षि

तत्वात्॥ स्वप्रतियोग्यनधिकरणहेत्वधिकरणइति षः॥ प्रतियोग्यनधि
करणंचप्रतियोगितावच्छेदकावच्छिन्नानधिकरणंबोध्यं॥ तेनविशिष्टसत्ता
वान्जातेरित्यादौजात्यधिकरणगुणादेर्विशिष्टसत्ताभावप्रतियोगिस त्ता
धिकरणेऽपिनक्षतिः॥ अत्रचसाध्यतावच्छेदसंबंधेनप्रतियोग्यधिकरण
त्वंबोध्यं॥ तेनज्ञानवान्सत्वादित्यादौसत्ताधिकरणघटादेर्विषयतयाज्ञानाधि
करणत्वेऽपिक्षतिः॥ इत्थंचवह्निमान्धूमादित्यादौधूमाधिकरणेसमवायेन
वह्निविरहसत्वेऽपिनक्षतिः॥ ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्य
कस्यचिदनधिकरणत्वं॥ तत्सामान्यस्यवायत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंवाविवक्षितं॥ आद्येकपीसंयोगीएतद्वृक्षत्वादित्यत्राव्याप्तिः॥ कपिसंयोगाभावस्यहिप्रतियोगितावच्छेदकावच्छिन्नोवृक्षाद्यत्तिरपिकपिसंयोगोभवतितदनधिकरणंवृक्षइति॥ द्वितीयेतुप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः॥ सर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्॥ नचवह्निमान्धूमादित्यादौघटाभावादेःस्वाभावात्मकप्रतियोग्यधिकरणत्वंयद्यपिपर्वतादेस्तथापिसाध्यतावच्छेदकसंबंधेनतत्प्रतियोग्यनधिकरत्वमस्त्येवेति॥ कथंप्रतियोगिव्यधिकरणाभावाप्रसिद्धिरितिवाच्यं॥ घटाभावेयोवन्त्वाभावस्तस्यघटाभावात्मकतया

घटाभावस्यवह्निरपिप्रतियोगीतदधिकरणंचपर्वतादिरितिक्रमेणप्रतियो
गीव्यधिकरणस्याप्रसिद्धत्वात्।।यदिघटाभावोदेवदत्ताभावादिभिन्नइत्यत्र
तथापिधूमाभावावान्देवदत्ताभावादिसाधनेव्याप्तिरितिचेन्न।। तत्रसाध्यताव
च्छेदकसंबंधःस्वरूपसंबंधस्तेनसंबंधेनसर्वस्यैवाभावस्यपूर्वक्षणवृत्ति
त्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वात्हेत्वधिकरणस्येति।। ततो
येतुकपिसंयोगाभावावान्आत्मत्वादित्यादावव्याप्तिः।। तत्रात्मवृत्तिकपिसंयोगा
भावाभावः कपिसंयोगस्तस्यप्रतियोगितावच्छेदकंगुणसामान्याभावस्वमपि
तदवच्छिन्नाधिकरणत्वंचहेत्वधिकरणस्यात्मनइतिभिवंगा या

दृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वंहेतुमतस्तादृशप्रतियोगिता
नाश्रयत्वस्यविवक्षितत्वात्।। ननुकालोघटवान्कालपरिमाणादित्यत्रप्रति
योग्यधिकरणाभावाप्रसिद्धिः।। हेत्वधिकरणस्यमहाकालस्यजगदाधारत
यासर्वेषामेवाभावानांसाध्यतावच्छेदकसंबंधेनकालिकविशेषणतयाप्रति
योगिसमानाधिकरणत्वात्।। अत्रकेचित्।। महाकालेदृविशिष्टघटा
भावस्तत्रप्रतियोग्यधिकरणोमहाकालस्यचाधारत्वेपिमहाकाल
भेदविशिष्टघटानाधारत्वात्।। महाकालेमहाकालभेदाभावात्।। वस्तु
तस्तु।। प्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यनधिकरणीभूतहे

DR BHAU DA

वच्छिन्नप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नस्यतद्धेतुव्यापकत्वंबोध्यं॥ व्यापकसामाधिकरण्यंव्याप्तिः॥ इत्थंचकालोघटवान्कालपरिमाणादिस्तदोसंयोगसंबंधेनघटाभावप्रतियोगिनोघटस्यानधिकरणेहृदधिकरणेमहाकालेवर्त्तमानःसएवसंयोगेनघटाभावस्तस्यप्रतियोगितायांकालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नोभयाभावस्यसत्त्वान्नाव्याप्तिः॥ ननुप्रमेयवह्निमान्धूमादित्यादौप्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं॥ गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न॥ कंबुग्रीवादिमान्नास्तीतिप्रतीत्याकंबु

५०

ग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वविषयीकरणेनगुरुधर्मस्याप्यवच्छेदकत्वस्वीकारात्संक्षेपः॥ पक्षवृत्तित्वमिसत्रपक्षत्वंकिंतदाह॥ ॥सिषाधयिषयाशून्योसिद्धिर्यत्रनतिष्ठति॥ सपक्षस्तत्रवृत्तित्वज्ञानादनुमितिर्भवेत्॥ सिषाधयिषाविरहविशिष्टायाःसिद्धेरभावःपक्षतातद्वान्पक्षइत्यर्थः॥ सिषाधयिषामात्रेनपक्षताविनापिसिषाधयिषयाचनगर्जितेनमेघानुमानात्॥ अतएवसाध्यसंदेहोपिनपक्षताविनापिसंदेहंचनगर्जितेनमेघानुमानात्॥ सिद्धौसत्यामपिसिषाधयिषासत्वेऽनुमितिर्भवमेव॥ अतःसिषाधयिषाविरह

विशिष्टत्वसिद्धौविशेषणं॥ तथाचयत्रसिद्धिर्नास्तितत्रसिषाधयिषायोस
यामसयामपिपक्षता॥ यत्रसिषाधयिषास्तितत्रसिद्धौसयामसयांचपक्ष
ता॥ यत्रतुसिद्धिरस्तिसिषाधयिषाचनास्तितत्रनपक्षता॥ सिषाध
यिषाविरुविशिष्टसिद्धेःसत्वात्॥ ननुयत्रपरामर्शोनंतरंसिद्धिः
ततःसिषाधयिषातत्रसिषाधयिषाकालेपरामर्शोनानुमितिः॥
यत्रसिद्धिपरामर्शसिषाधयिषाःक्रमेणभवंतितत्रसिषाधयि
षाकालेसिद्धिर्नास्तीत्यतिबंधकाभावादेवानुमितिः॥ यत्रसि
षाधयिषासिद्धिपरामर्शस्तत्रपरामर्शकालेसिषाधयिषे

वनास्ति॥ एवमन्यत्रापिसिद्धिकालेपरामर्शकालेचनसिषाध
यिषा॥ योग्यविरुविशेषणानांयोगपद्यनिषेधात्कथंसिषाध
यिषाविरुविशिष्टसिद्धेर्विशेषणमितिचेन्न॥ यत्रवह्नि
व्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षंस्मरणंवातत्तःसि
षाधयिषातत्रपक्षतासंपद्यतेतद्विशेषणस्यावश्यकत्वादिति॥
अन्येत्वेवंबोध्यं॥ यादृशसिषाधयिषासत्वेसिद्धिसत्वेयल्लिंगका
नुमितिस्तादृशसिषाधयिषाविरुविशिष्टसिध्यभावस्तल्लिं
गकानुमितौपक्षता॥ तेनसिद्धिपरामर्शसत्वेयत्किंचित्

ज्ञानंजायतामितीच्छयामपिनानुमितिः॥ वन्हिव्याप्यधूमवान्
पर्वतोवन्हिमानितिप्रत्यक्षसत्वेप्रत्यक्षाद्यंतरिक्तंजायतामि
तीच्छायांसत्वेवाएवंधूमपरामर्शसत्वेआलोकेनवन्हिम
नुमियामितीच्छायामपिनानुमितिः॥ सिषाधयिषाविरहका
लेयादृशसिद्धिसत्वेनानुमितिस्तादृशीसिद्धिर्विरोध्यंक्तु
व्याः॥ तेनपर्वतस्तेजस्कोपाषाणमयोवन्हिमानितिज्ञान
सत्वेनानुमितेर्विरोधः॥ परंतुपक्षतावच्छेदकसामा
धिकरण्येनसाध्यसिद्धावपितदवच्छेदेनानुमितिदशी

नासक्षतावच्छेदकावच्छेदेनानुमितिंप्रतिपक्षतावच्छेदकावच्छेदेनसिद्धिरेव
प्रतिबंधकाः॥ पक्षतावच्छेदसामानाधिकरण्येनानुमितिंप्रतितुसिद्धिमा
त्रंविरोधीः॥ इदंतुबोध्यंः॥ यत्रायंपुरुषोनवेतिसंशयानंतरंपुरुषत्व
व्याप्यकरादिमानितिज्ञानंतत्रासत्सामनुमित्सायांपुरुषस्यप्रत्यक्षंन
वर्तिष्यतेनत्वनुमितिः॥ अतोऽनुमित्साविरुद्धविशिष्टसमानविषयका
प्रत्यक्षसामग्रीकामिनीजिज्ञासादिवत्तुल्यातंत्रेणप्रतिबंधिकाः॥
एवंपरामर्शानंतरंविनाप्रत्यक्षेपक्षादिप्रत्यक्षानुपपत्तेः॥ प्रत्यक्षे
छाविरुद्धविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्यक्षेप्रतिबं

धिका॥ प्रसंगाद्धेत्वाभासान्विभजते॥ अनेकांतोविरुद्धस्याप्यसिद्धिः प्रतिपक्षितः॥ कालात्ययापदिष्टस्यहेत्वाभासस्यपंचधा॥ आद्यः साधारणस्तस्यादसाधारणकोपरः॥ तथैवानुपसंहारीत्रिधानैकांतिको भवेत्॥ तल्लक्षणंच॥ यद्विषयकस्वेनज्ञानस्यानुमितिविरोधित्वं॥ तथाहि॥ व्यभिचारद्विषयकस्वेनज्ञानस्यानुमितिविरोधित्वेनदोषः॥ यद्विषयकस्वंचयादृग्विरुद्धविषयकस्वंबोध्यं॥ तेनबाधभ्रमस्यानुमितिविरोधित्वेपितत्रपर्वतोवन्न्याभाववान्इतिविरुद्धस्याप्रसिद्धत्वान्नहेतुदोषः॥ नचयत्रवन्न्याभाववान्पर्वतइतिविरुद्धस्याप्रसिद्धत्वान्नहेतुदोषः॥ नचयत्रवन्न्याभाववत्पाषाणमयत्ववानितिपरामर्शकालेवन्निव्याप्यधूमस्याभासत्वेनस्यात्॥ तत्रवन्न्याभाववत्व्याप्यवान्पर्वतइतिविरुद्धस्याप्रसिद्धत्वादितिवाच्यं॥ इष्टापत्तेः॥ अन्यथाबाधस्याप्यनिरस्तदोषत्वापत्तेः॥ तस्मात्तत्रवन्न्याभाववत्व्यापाषाणमयत्ववानितिपरामर्शकालेवन्निव्याप्यधूमस्यानाभासत्वं॥ भ्रमानुमितिप्रतिबंधमात्रं॥ हेतुस्तुनदुष्टइति॥ इत्थंचसाध्याभाववद्वृत्तिहेत्वादिकंदोषः॥ तद्वत्ताचहेतोर्येनकेनापिसंबंधेनेतिनव्याः॥ परेतु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017